तस्माज्जाते क्रियाविरिक्तो ज्ञानानुभववितिसिद्धं ॥ किंच ॥ अहंकाराश्रयस्मृतिः कस्यको वा स्वन्नस्य कारकः ॥
जातिरूपतपोवृत्तविद्यादिभिरहंकृतः ॥ शब्दादिविषयोद्योगकर्मणा मनसा गिरा ॥ यद्यात्माधु वो
नुस्मरणेनुभूताद्योगोद्धुरास्मृतिः स्वर्वनुभवभावितसंस्कारोद्बोधनिबंधनाकस्मभवेत् ॥ नस्मैन
ति दृष्टवस्तुन्यस्य स्मृतिरस्य घते ॥ तथा कः स्वन्नज्ञानस्य कारकः नहीक्रियाणामुपरतव्यापाराणां तत्का
रकत्वं तथाहमेवाभिजनत्वादिसंपन्न इत्येवं विधोभिसंधानं ममयः कस्य भवति स्थिरात्मवति
रिक्तस्य तथा शब्दस्पर्शादिविषयोपभोगासिद्धयर्थमुद्योगं मनो वा कायैः कः कुर्यात्तस्मादपि बुद्धी
द्धिमवाति रिक्त आत्मा स्थितः ॥ उपासनाविशेषविध्यर्थं संसारस्वरूपं विवृण्वन्नाह ॥ ससंदिग्धम
तिः कर्मफलमश्नुते विवा ॥ विप्लुतः सिद्धमात्मानं मसिद्धोपि हि मन्यते ॥ योसौ पूर्वोक्त आ
त्माविप्लुतोहंकारदूषितः स सकलकर्मसु फलमश्नुते इति संदिग्धमतिर्भवति ॥ तथा सिद्धोप्यस ति
न्नात्मा योपि सिद्धमिव केनापि मिवात्मानं मन्यते ॥ किंच ॥ ममदाराः सुता मात्या अहमेषामिति स्थितिः ॥

मदीयमिति ममेमतेगद्विपुष्टे वमो रतिं ह्रासे दुःखमवाप्नोति स्वकीयस्यजनोयं । क्रमात्परवशं यातेनमदीयत्वं नगच्छति

ति। कथमस्य तत्त्वमाश्रित्य इत्यत आह॥ तत्त्वस्त इति उपस्थानात्तत्त्वयोगात्परीक्षयात्॥ कर्मणः संनि
भि॰ ए॰ कर्षात्त्व सतां योगः प्रवर्त्तते॥ आत्मा व्यक्तस्तत्त्वस्तेरात्मनि निश्चलता योपस्थानात्सत्त्वशुद्धिः योगात्के
२६ वलस्य सत्त्वगुणयोगात्कर्मबीजानां परिहृतया सत्पुरुषाणां च संबंधादात्मयोगः प्रवर्त्तते॥ किंच
शरीरसंलग्ने स्वमनः सत्त्वस्थमीश्वरं॥ अविप्लुतमतिः सम्यक् सजातिस्मरतामियात्॥ यस्य पुनर्योगि
नो विप्लुतमतेः शरीरसंलग्ने समये मनः सत्त्वसंयुक्तं सम्यगेकाग्रतया ईश्वरं प्रति का प्रियते स यथु
पासनाप्रयोगात् प्रवीणतया आत्मानं नाधिगच्छति तर्हि विशिष्टसंस्कारपाटववशेन जात्यंतरानुभूत
कृमिकीटादिनानागर्भवासादि समुद्भूतदुःखस्मरणं च प्राप्नुयात् स्मरणेन च जातो हेयत्वहि केवलकारिणि
23 योगे प्रवर्त्तते॥ यस्य संस्कारस्तथा पूर्वजातिं न स्मरति तस्य का गतिरित्याह॥ पश्यन्हि भ्रमतो वर्गान्वैरीय
मानस्य तनुम्॥ नानारूपाणि कुर्वाणस्य यान्त्या कर्मजातनुः॥ भ्रमतो नवः सत्त्वयारामेणा वृणां दिना ना
रूपाणि कुर्वाणः सितासितपीतादिवर्णैरात्मनस्तनुं वर्धयति येन मनसा तनोः कर्मफलोपभोगार्थं कु बु एम
वामनादि नानारूपाणि कर्मनिमित्तानि कलेवराणि पश्यन्॥ किंच॥ कालकर्मात्म बीजानां दोषैर्मातुस्तथैव च॥ २६
गर्भस्य वैकृतं दृष्टमंगहीनादि जन्मनः॥ न केवलं कर्मैव कुब्जवामनत्वादिनिमित्तं किंतु कालकर्मणी

तस्माज्ज्ञाने क्रियाशक्तिरिति को नाम युक्तिरिति सिद्धं ॥ किंच ॥ कोऽतीतानागतस्मृतिः कस्य कोऽवास्यप्रस्य कारकः ॥
जातिरूपं तपोवृत्त विद्यादिभिरहं कृतः ॥ शब्दादिविषयोपभोगं कर्मणामनसागिरा ॥ पश्चात्साधुत्वो
नस्यागतो सेनुभूतार्थयोगोऽनुरागस्मृतिः पूर्वमनुभवभावितसंस्कारोद्बोधनिबंधनाकस्य भवेत् ॥ नह्यन्येन
दृष्टं वस्तु मन्यस्मृत्युपसंधत्ते ॥ तथा कः स्वप्नज्ञानस्य कारकः नहीं क्रियाणामनुपरतव्यापाराणां तत्का
रकत्वे तथाहमेवाभिजनत्वादिसंपन्न इत्येवं विधोभिसंधानं मम यः के स्य भवति स्थिरात्मवति
रिक्तस्य तथा शब्दस्पर्शादिविषयोपभोगासिद्धं तथ्यमनुयोगं मनोवाक्कायैः कः कुर्यात्तस्मादपि बुद्धी
क्रियावति रिक्त आत्मा स्थितः ॥ उपासनाविशेषविध्यर्थं संसारस्वरूपं विशदयन्नाह ॥ संसारधर्म
तिः कर्मफलमश्निन्वते निवा ॥ विप्लुतः सिद्धमात्मानं मसिद्धोऽपि हि मन्यते ॥ योऽसौ पूर्वोक्त आ
त्माविप्लुतोऽहंकारदूषितः स स कलकर्मसु फलमश्निन्वते ति संदिग्धमेव भवति ॥ तथा ॥ सिद्धोप्यस
ता यो पि सिद्धमिव कृतार्थमिवात्मानं मन्यते ॥ किंच ॥ मम दाराः सुता मात्या अहमेषामिति स्थितिः ॥

ति

ति

ममीयमित्यभिमन्ते गविपुष्टे वपोरति हा खेदः खमवाप्नोति त्वकोपसप्जनो ह्ययं । क्रमात्परवशं याने मदीय त्वं नगक ति

ति। कथमसन्नत्वमात्मा इत्यत आह॥ तत्त्वस्मृतेरुपस्थानात्सत्त्वयोगात्परीत्यपात्॥ कर्मणः संनि
मि॰ ए॰ कर्षाच्च सत्तां योगः प्रवर्तते॥ आत्मोपस्थानात्तत्त्वस्मृतेरात्मनि निश्चलतयोपस्थानात्सत्त्वशुद्धिः योगात्के
वलसत्त्वगुणयोगात्कर्मबीजानां परित्यागात्सत्पुरुषाणां च संबंधादात्मयोगः प्रवर्तते॥ किंच॥
२६ शरीरसंतापे यस्य मनः सत्त्वस्थमीश्वरं॥ अविप्लुतमतिः सम्यक् सजातिस्मरतां मे स्यात्॥ यस्य पुनर्योगि
नो विप्लुतमतेः शरीरसंतापसमये मनः सत्त्वसंयुक्तं सम्यगेकाग्रतया ईश्वरं प्रति का प्रियते स यपु
पासना प्रयोगाः प्रवीणतया ज्ञानं नाधिगच्छति तर्हि विशिष्टसंस्कारपाटववशेन जातं पुनरनुभूत
कृमिकीटादि नानागर्भवासादि समुद्भूतदुःखस्मारत्वे प्राप्नुयात् स्मरणेन च जातो हेयम् हि केष्वकारिणि
23 योगे प्रवर्तते॥ यतः संस्कारस्तया पूर्वजातिं न स्मरति तस्यका गतिरित्याह॥ यथा हि भरतो वैराग्यवर्णीय
मानन सुनुम॥ नानारूपाणि कुर्वाणस्तथात्मा कर्मजान्तनुः॥ भरतो नवःसय पाराभावुणादिना ना
रूपाणि कुर्वाणः सितासितपीतादि विविधरूपैरात्मनस्तनुं बधाति इति तथैवात्मा तत्तत्कर्मफलोपभोगयोग्यं कुब्ज एम
वामनादि नानारूपाणि कर्मनिमित्तानि कलेवराणि आदत्ते॥ किंच॥ कालकर्मवशेनैव बीजानां तत्तत्रैव मनुष्य एव च॥ २६
गर्भस्य वैकृतं दृष्टमंगहीनादि जन्मतः॥ न केवलं कर्मैव कुब्जवामनत्वादिनिमित्तं किंतु कालकर्मणि

आपधारणं ॥ विषयेंद्रियसंरोधस्संभाल स्यविवर्जनं ॥ शरीरपरिसंख्यानं जन्मादिदोषदर्शनं ॥ नी
रजस्तमतास ... लघुवृत्तिनिस्पृहतानाशमः ॥ एतैस्साधैः संयुक्तः सन्ब्रह्मयोग्यमतीभवेत् ॥ विद्यार्थिभ
चाप्यसेवा वेदान्तादिषु पातञ्जलादियोगशास्त्रार्थेषु च विवेकित्वं तत्प्रतिपादितध्यानादिकर्म
णा मनुष्याणां सत्सु संसंगः ॥ प्रियहितवचनत्वं ललनालोकनालंभयोः परित्यागः सर्वभूतेष्वा
त्मदर्शनं परिग्रहत्यागो ... निरोधस्तद्वीनिद्राभंगजीर्णकालापधारणं तथा शब्दस्पर्शा
दिविषयेषु श्रोत्रादीन्द्रियाणां प्रवृत्तिनिरोधस्तद्वीनिद्रानुकारिणी आलस्यमनुत्साहस्त
यो विशेषेण त्यागः शरीरकस्य परिसंख्यानमस्थिरताशुचित्वादिदोषानुसंधानं तथा सक
लगमनादिप्रवृत्तिषु सूक्ष्मप्राणिवधादिदोषपरामर्शस्तथा रजस्तमोविधुरता प्राणायामा
दिभिर्भवशुद्धिः निस्पृहता विषयानभिलाषः ॥ शमो बाह्यान्तःकरणसंयमः ॥ एतेषां चा
भ्यासनादिभिरुपायैः सम्यक्प्रवृत्तः केवलमावमुक्तो ब्रह्मोपासनेनामतीभवेन्मुक्तोभव

मि.रा. २२ हेतुभूता दृष्टादृष्टत हिहठुकाप्यकरहृष्टहेतूपनिपातेन प्रतिबंधरीति ॥ मोक्षमार्गमाह ॥ अनंता
रश्मयस्तस्य दीपवद्यः स्थितो हृदि ॥ सितासिताः कद्रुनीलाः कपिलाः पीतलोहिताः ॥ ऊर्ध्वमेकस्थि
तस्तेषां यो भित्वा सूर्यमंडलं ॥ ब्रह्मलोकमतिक्रम्य तेन याति परां गतिं ॥ योसौ हृदि प्रदीपवत्स्थि
तो जीवस्तस्यानंतरश्मयो नाड्यः सुखदुःखहेतुभूता इह सप्तति सहस्राणीत्यादिनोक्ताः ॥ सितासितकद्रु
नीलादिरूपाः सर्वतः स्थितास्तासामेका रश्मिरूर्ध्वमेव स्थिता योसौ मार्तंडमंडलं निर्भिद्य हिरण्यगर्भ
निलयं याति क्रम्य वर्तते तेन जीवः परां गतिं पुनरावृत्तिलक्षणां प्राप्नोति ॥ स्वर्गमार्गमाह ॥ यदस्या
24 न्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् ॥ तेन देवशरीराणि सधामानि प्रपद्यते ॥ यदस्यात्मनो
मुक्तिमार्गभूतानूर्ध्वमेतन्यद्रश्मिशतमूर्ध्वकारमेवत्मव स्थितं तेन सुरशरीराणि तैजसानि सु
खैकभोगाधिकरणानि सधामानि कनकरजतरत्नरचितामरपुरवरसहितानि प्रपद्यते ॥
संसारमार्गमाह ॥ ये नैकरूपाश्चाधस्ताद्रश्मयोस्य मृदुप्रभाः ॥ इह कर्मोपभोगाय तैः संसरति सो एम
वशः ॥ ये तु जसा स्याधस्ताद्रश्मयो मृदुप्रभास्तैरिह फलोपभोगार्थं संसारे संसरति अवशः स्वकृतकर्म २२

स्वकारणबीजरोपोमात्रदोषश्चेति इदमेतत्सहकारिकारणमेतेनदृष्टादृष्टरूपेणकारणकलापेनगर्भ
स्यांगहीनत्वादिविकारोजन्मतआरभ्यानियतकालोदृष्टः॥ ननुप्राकृतिकप्रलयावसरेमहदाद्य
खिलविकारविनाशेकर्म्मणोनाशात्कथंतन्निबंधनःप्रत्ययमपि उपरिअहंकारेपाशंक्याह॥ अहंकारे
णमनसाण्यात्कर्म्मफलेनच॥ शरीरेणचनात्माप्यनुत्तपूर्वककथंचनः॥ मनोहंकारोऽसिद्धौगतिः
संसरणहेतुभूतोशेषराशिकः कर्म्मफलंधर्म्माधर्म्मरूपंशरीरंलिंगात्मकंएतैरहंकारादिभिरयमात्मा
कदाचिदपिनविमुच्यतेयावन्मोक्षः॥ ननुप्रतिनियतकर्म्मणांजीवानांप्रतिनियतकालमेवोपरतिर्दृ
ष्टः॥ ननुनःसंग्रामादौयुगपदकालेप्राणसंक्षयपरितापशंक्याह॥ दवदीपाधारस्नेहयोगाद्यथादीपस्य
संस्थितिः॥ विक्रियापिचदृष्टैवमकालेप्राणसंक्षयः॥ यथाहिखलुतैलक्षिप्तानेकवर्तिवर्त्तिनीनां
नानाज्वालानांयुगपत्स्थितिस्तासांचास्थितानांपटुतरपोद्भूयमानपवनाहतिरूपविपत्तिहेतुनि
पातयौगपद्याद्युगपदुत्पत्तिर्यथाभवति॥ तथैवरथिसारथिवाजिकुंजरादिजीवानांयुद्धाख्यो
पपत्तिहेतुयौगपद्यादकालेपिप्राणपरिहारोनानुपपन्नः॥ एतदुक्तंभवति। प्रतिनियतकालविपत्ते

रणगुणत्वादृत्तो भोक्तिकदेहातिरिक्तः स्थैर्यतस्मादिसमवायमभ्युपगीकर्तव्यः ॥ सत्यानृते असिद्धे अयोहित
मि॰रा॰ प्राप्तिः सुखदुःखे चामुष्मिके तथाशुभकर्मानुष्ठानमशुभकर्मपरित्यागं तेऽस्य स्थानं नियते देहाति
२८ रिक्तात्मानुमानं ॥ निमित्तं भूकंपादिशाकुनज्ञानं पिंगलादिपतत्रिचेष्टालिंगकं ज्ञानं ग्रहाः सूर्यादि
यस्तत्संयोगजैः फलैः तारा च भिन्नादिव्यतिरिक्तानि ज्योतीषि नक्षत्राण्यश्वयुक्प्रभृतीनि ते
षां संचारैः शुभाशुभफलद्योतने जाग्रदवस्थाजन्मेऽस्य सह छिद्रादिमाददर्शने स्वप्ना स्वप्नजैः ख
25 रवराहयुक्तरथारोहणादिज्ञाने तथा काशादिष्वस्य जीवोपभोगार्थत्वात् स्वप्ने तथा मन्त्रसाध्या
पुण्यापुण्यां हृदयान्माद्देहेनुपपद्यमानयात्तथा मन्त्रौषधफलैः प्रेता पूर्वकैः सुदुष्कर्माद्यैः साक्षात्स
रपरयावा देहेनुपपद्यमाने वैद्यमानं हेतुनयो वित्तं जानीत ॥ किंच ॥ अहंकारस्मृतिर्धीरिच्छा द्वेषो बुद्धिः
सुखं धृतिः ॥ इंद्रियांतरसंचार इच्छाधारणं जीविता ॥ स्वर्गस्वप्नस्वभावानां प्रेरणं मनसो गतिः ॥ निमेषः राम
श्चेतना यत्न आदानं पांचभौतिकम् ॥ यत एतानि लिंगानि दृश्यंते परमात्मनः ॥ तस्मादस्ति परो देहा २८
दात्मा सर्वग ईश्वरः ॥ अहं कृतिरहंकारः स्मृतिः प्राग्भवीयानुभवभावितसंस्कारोद्बोधनिबंधना स्मृतिप

परतंत्रः ॥ भूतचैतन्यवादिपक्षं परिजिहीर्षुराह ॥ वेदैः शास्त्रैः सद्विज्ञानैर्जन्मना मरणेन च ॥ आत्मनित्यता
तथाप्यात्मा सत्येन ह्यन्यः तेन च ॥ श्रेयसः सुखदुःखाभ्यां कर्मभिश्च शुभाशुभैः ॥ निमित्तशकुनज्ञान
ग्रहसंयोगजैः फलैः ॥ ताराणां ऋक्षसंचारैर्जागरैः स्वप्नजैरपि ॥ आकाशपवनज्योतिर्जलभूतिमि
रैस्तथा ॥ मन्वंतरैर्युगग्रासैर्मंत्रौषधफलैरपि ॥ विद्यात्मानं तु मानवैः प्रमाणं कारणं जगतस्तथा ॥
वेदैः स एष नेति नेत्यात्मेति अस्थूलमनण्वह्रस्वमपाणिपादरित्यादिभिः शास्त्रैश्च मीमांसान्वीक्षिक्या
दिभिः विज्ञानैश्च ममेदं शरीरमित्यादिदेहव्यतिरिक्तात्मरूपानुभवैस्तथा जन्ममरणाभ्यां जन्मांतरानु
ष्ठितधर्माधर्मनियताभ्यां देहादिव्यतिरिक्तात्मानुमानं आजन्मांतरगतकर्मानुष्ठाननियत
पातस्यापतनागमनाभ्यां ज्ञाने वा संपत्ताधारनियताभ्यामपि भौतिकदेहातिरिक्तात्मानुमानं
॥ न हि देहस्य चैतन्यादिसमवायः संभवति यतः कारणगुणप्रक्रमेण कार्यद्रव्ये वैशेषिके गु
णारंभदृष्टे न च कारणभूतेषु पार्थिवपरमाणुषु चैतन्यादिसमवायः संभवति तदारब्धस्तंभकुं
भादिभौतिकेष्वनुपलंभात् ॥ न च मदशक्तिवद्गुडकादिद्रव्यांतरसंयोगरीतिवाच्यं ॥ शक्तेः साध्या

मि॰रा॰
२९

ंद्रियाणि श्रोत्रादीनि सार्थानि शब्दादिविषयसहितानि मनः कर्मेंद्रियाणि वागादीनि तथा
हंकारो बुद्धिश्च निश्चयात्मिका पृथिव्यादीनि पंचभूतानि अव्यक्तं प्रकृतिरित्येतत्क्षेत्रमस्य
क्षेत्रस्य योसावीश्वरः सर्वगतो तत एव सद्रूपः प्रमाणं तत्राप्यात्मत्वादेतस्य दृष्ट प्रतीति कर्ता
सेंद्रसद्रूपो भावात्मा क्षेत्रज्ञ इति निगद्यते ॥ बुध्यादीनां तत्त्वानां निर्माह ॥ बुद्धेरुत्पत्तिरव्यक्तान्मनतो
हंकारसंभवः ॥ तन्मात्रादीन्यहंकारादेकोत्तरगुणानि च ॥ सत्वादिगुणसाम्यमव्यक्तं ततस्त्रिगु
णात्मा बुद्धेस्तत्त्वस्तस्मात् वैकारिकस्तैजसो भूतादिरिति त्रिविधोहंकार उत्पद्यते ॥ तन्मा
त्रादीनि शब्दादीनि तन्मात्रानाम शब्दतादिसंस्तकादहंकाराद्वैकारिकात्तैजसाभ्यां बुद्धिकर्मेंद्रियाणि
भूतानि ॥ गुणानाह पंचाह ॥ शब्दस्पर्शश्च रूपं च रसो गंधश्च सद्गुणाः ॥ तोयस्याग्नेस्तथैषां संत
सिन्नेवलीयते ॥ तेषां गुणानादिपंचम्बानामेकोत्तरवृद्धया पंचशब्दादयोगुणा वेदितव्याः ॥ एषां बु
ध्यादिविकाराणां मध्ये यो यस्मात्प्रकृत्या देवस्थनन्तः स तस्मिन्नेव स्वरूपेण प्रलयकाले प्र
लीयते ॥ प्रकरणार्थमुपसंहरन्नाह ॥ यथात्मानं स्वजन्मान्नानातथा वः कथितो मया ॥ विपाकाः

नादिभिश्चरसुखमैहिकं॥ एतैर्धैर्यमिंद्रियांतरेण दृष्टेर्थ इंद्रियांतरस्य संचारो यमहमद्राक्षं
तमहं स्पृशामीत्येवमनुसंधानरूपइंद्रियांतरसंचारः॥ अत्र हृत्यपरपतनं चैतन्यानां स्वरूपेण
लिंगत्वं पूर्वश्लोकेनुगमनसंभवचनादिहेतुत्वं पार्थिकं लिंगत्वं भिन्नयोनरूपं तत्र आधार
एणं शरीरस्य जीवितं प्राणधारणं स्वर्गो नियतं देहांतरोपभोग्यः सुखविशेषः स्वप्नः प्रसिद्धः॥
पूर्वश्लोकेनुस्वप्नस्य शुभाशुभफलद्योतकतया लिंगत्वमत्र स्वरूपेणोपयोगः रूपं भाव
नामिंद्रियादीनां प्रेरणं गतिश्चेतनाधिष्ठानं व्याप्तानि मेषः अस्ति इत्युत्पा पंचभूतानामु
पादानं यस्मादेतानि लिंगानि भूतेषु अनुपपन्नानि सामान्यात्परं परमात्मनो बो
तकानि दृश्यंते तस्मादस्ति देहातिरिक्तात्मा सर्वग ईश्वर इति सिद्धं॥ क्षेत्रस्वरूपमाह॥
बुद्धींद्रियाणि सार्वाणि मनः कर्मेंद्रियाणि च॥ अहंकारश्च बुद्धिश्च पृथिव्यादीनि चैव हि॥
अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्येह निगद्यते॥ ईश्वरः सर्वभूतस्थः सन्नसन्सदसन्मयः॥ बु

प्रतिसंचरैः ऽखिलाध्यापकमलयाद विदितवेदस्तस्यापरिचितज्ञानाः कथमिवाग्निहोत्रादिकं कर्मक
मि·ए· रिष्यति । कथं न एवं चाहृत कर्म्मीणाः स्वर्गमार्गमधिरोहन्तीत्यत आह ॥ तत्राष्टाशीतिसहस्राणि मुनयो
गृहमेधिनः ॥ पुनरावर्त्तिनो बीजभूता धर्म्मप्रवर्त्तकाः ॥ तत्र पितृयाणे अष्टाशीतिसहस्रसंख्यामुनयोग
३ हस्थाश्रमिणः पुनरावृत्तिधर्माणः स्वर्गार्थो वेदस्योपदेशकस्तयाधर्मतन्तु प्रादुर्भावबीजभूताः संतोग्नि
होत्रादिधर्म्मप्रवर्त्तकाः । अतोन प्राग्दिनदोषसमाश्रयः ॥ किंच ॥ सप्तर्षिनागवीथ्युत्तरे वै लोकं स
मोश्रिताः ॥ तावन्त एव मुनयः सर्वारंभविवर्जिताः ॥ तपसा ब्रह्मचर्येण संगत्यागेन मेधया ॥ तत्रगत्वा
27 वतिष्ठन्ते ॥ यावदाभूतसंप्लवं ॥ सप्तर्षयः प्रसिद्धाः ॥ नागवीथ्याः दक्षिणे पथ सरंतराले तावन्त एवाष्टा
शीतिसहस्रसंख्या मुनयः सर्वारंभविवर्जिताः केवलध्याननिष्ठास्तपोब्रह्मचर्ययुक्ताः संगत्यागि
नोर्ध्वलोकं समाश्रिताः ॥ आभूतसंप्लवं प्राकृतप्रलयपर्यंतमवतिष्ठन्ते तत्रस्थितास्ते च सावाध्या
मे मिकधर्माणां प्रवर्तकाः ॥ कथंभूतास्ते मुनय इत्यत आह ॥ यतो वेदाः पुराणानि विद्योपनिषदस्तथा ॥ एम
श्लोकाः सूत्राणि भाष्याणि यच्च किंचन वाङ्मयं ॥ यतो हि विभावादपि मुनिसमूहाच्च तारो वेदाः पुराणं ३

त्रिप्रकाराणां कर्मणामीश्वरोपि सन् ॥ सत्वं रजस्तम इत्येवं कीर्त्तिताः ॥ रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते स
दा ॥ अनादिरादिमांश्चैव स एव पुरुषः परः ॥ लिंगेन्द्रियग्राह्यरूपः सविकार उदाहृतः ॥ मानसादि त्रिप्रका
रकर्मणां विपाकोदीश्वरोपि सन्नात्मानं सृजतीति यथा युष्माकं कथितः ॥ सत्वादयश्च गुणास्तस्यैवावि
षयाविष्टः संकीर्त्तितास्तथा स एव रजस्तमोभ्यामाविष्टश्चक्रवदिह संसारे भ्राम्यतीत्यपि कथितः स ए
वानादिः परमपुरुषः शरीरग्रहणेनादिमान् कुब्जवामनत्वादिविकारसहितस्तथा स्थूलाकारतया प्र
रणैर्लिंगेन्द्रियैश्च ग्राह्यरूप उदाहृतः ॥ अथ मार्गमाह ॥ पितृयानोजवीथ्याश्च यदगस्त्यस्य चा
न्तरम् ॥ तेनाग्निहोत्रिणो यान्ति स्वर्गकामा दिवं प्रति ॥ अजवीथ्यगस्त्यमार्गः तस्यागस्त्यस्य च यदन्तरं सो
पितृयानः स्वर्गमार्गः तेनाग्निहोत्रिणः स्वर्गकामाः स्वर्गमाप्नुवंति ॥ किंच ॥ प्रवृत्तदानपराः सम्यगिष्टिभिश्च
गुणैर्युताः ॥ तेपि तेनैव मार्गेण सत्यव्रतपरायणाः ॥ ये च दानादिसत्कर्मपराः सम्यगारंभरहिताः त
थाष्टाभिरात्मगुणैर्दयाक्षान्तिरनसूयाशौचमनायासो मंगलमकार्पण्यमस्पृहेत्येतैर्गौतमादिस्मृति
पादितैर्युक्ताः तथा ये च सत्यवादिनस्तेपि तेनैव पितृयानेन सुरसदनमाप्नुवंति ॥ ननु नैमित्तिकादि

गि॰
३१

आत्मानं विंदंति लभंते प्राप्नुवंति॥ अर्चिमार्गमाह॥ क्रमात्ते संभवंत्यर्चिरहः शुक्लं तथोत्तरं॥ अथ
नं देवलोकं च सवितारं सविद्युतं॥ ततस्तान्सुरूपोभ्येत्य मानसो ब्रह्मलौकिकान्॥ करोति पुनरावृ
त्तिस्तेषामिह न विद्यते॥ ते विदितात्मानः क्रमादग्न्याद्यभिमानिदेवतास्थानेषु विश्रम्य तैः प्रस्था
पितः परमपदं प्राप्नुवंति॥ अर्चिरर्चिः अहर्दिनं शुक्लं शुक्लपक्षः तथोत्तरायणं देवलोकं सुरस
द्मसवितारं सूर्यं वैद्युतं च तेजस्तानेवं क्रमादर्चिरादिस्थानंगतान्मानसः पुरुषो ब्रह्मलोकभाजः
करोति तेषामिह संसारे पुनरावृत्तिर्न विद्यते किंतु प्राकृतप्रतिसंचरावसरे समकालिंगशरीरः प

२८

रमात्मनैकीभवंति॥ पूर्वोक्तपितृयाणमाह॥ यज्ञैश्च तपसा दानैर्ये स्वर्गजितो नराः॥ धूमं निशां कृ
ष्णपक्षं दक्षिणायनमेव च॥ पितृलोकं चंद्रमसं वायुं वृष्टिं जलं महीं॥ क्रमात्ते संभवंतीह पुनरेव
व्रजंति च॥ एतद्येन विजानाति मार्गौ द्वितयमात्मवान्॥ देहात्मकः पतंगो वा भवेत्कीटोथवा क्रमैः॥ एम
॥ ये पुनर्विहितैर्यज्ञदानतपोभिः स्वर्गफलभोक्तारस्ते क्रमाद्धूमादि चंद्रपर्यंत पदार्थाभिमानिनी
र्देवताः प्राप्य पुनरेव वायुवृष्टिजलभूमीः प्राप्य व्रीह्याद्यन्नरूपेण शुक्रत्वमवाप्य संसारिणो ३१

गवितोपनिषदश्च नित्यभूतारण्याध्येतृपरंपरयाग्रवृतात्मन्यान्यो कारेतिहासात्मकाः॥ सूत्राणि च शब्दा
नुशासनमीमांसागोचराणि भाष्याणि वसूत्र॥ व्याख्यानरूपाणि परस्परदोषविद्याहिकविद्याप्रेत्यदपि
यत्र कारणमकृतं तत्प्रतिपादितं मुनयो धर्मप्रवर्तकाः॥ एवं सति वेदस्यापि नानित्यतादोषप्रसंगः॥ ततः
किमित्याह॥ वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः॥ श्रद्धोपवासः स्वातंत्र्यमात्मनो ज्ञानहेतवः॥ वेदस्य
नित्यत्वे सति तस्यात्मा एव तस्य हेतुरनुवचनादयः सर्वेषु आपादनद्वारेण ज्ञानसहितं वरिमुप
पन्नं भवति॥ किं च सर्वमात्मभोविजिज्ञासुः समस्तैरेवमेव तु॥ दृष्टव्यस्तत्र प्रथमं तावच्छ्रोतव्यश्च द्विजातिभिः
॥ तमेतमेवं विदंति यं वेदवचनेन कामाश्रिताः॥ उपासते द्विजाः सत्यमङ्गपरमायुताः॥ यस्मान्नित्यतया प्र
माणभूतो वेदस्तस्माद्वाक्यमार्गेण सकलानामपि भिन्नानां प्रकारं जिज्ञासितव्य स एवं प्रकारं दर्शयति
हि ज्ञानिभिर्दृष्टः स्वोपरोतीकमतभिक्षत्रो पायं दर्शयति॥ श्रोतव्यो मंतव्य इति प्रथमतो वेदांतश्रवणेन नि
र्णीतव्यस्तदनंतरं मंतव्यो युक्तिभिर्विचारयितव्यस्ततो ध्यानेनापरोक्षीभवति॥ ये हि ज्ञातयो॰ निराग्रहः
श्च उपयुक्ताः सन्तो निर्जनप्रदेशमाश्रिताः॥ एवमुक्तेन मार्गेणात्मानं सत्यं परमार्थभूतमुपासते ते

तव्यः तत्र च हृदि स्वात्मानं मनोगोचरतया धारयेत् तथा धारणां च धारयेद् आरण्यस्य पंचजान्वयश्रम
णेन [illegible] छोटिकादानकालो मात्रा ताभिः पंचदशमात्राभिरधमः प्राणायामः त्रिंशता मध्यमः पंचच
शि॰ए॰ त्वारिंशता उत्तमः ॥ २ ॥ एवं प्राणायामत्रयात्मिकैकधारणा नास्ति हठयोगशब्दवाच्या लाधारयेद्य
२२ थोक्तमन्यत्र सव्यान्स छोटिकां दद्यात् एवं जानुमंडले मात्राभिः पंचदशभिः प्राणायामोऽधमः स्मृतः
मध्यमो द्विगुणः [illegible] त्रिगुणो धारणा तेषां त्रिभिस्त्रिभिः स्मृता एकैकालाभियोगस्तथैवचेति ॥ धा
रणाभ्यसतो योगाभ्यासप्रयोजनमाह ॥ अन्तर्धानं स्मृतिः कान्तिर्दृष्टिः श्रोत्रज्ञता तथा ॥ निजं शरीरमु
२३ त्सृज्य परकायप्रवेशनं ॥ अर्थानां छंदतः सृष्टिर्योगसिद्धेस्तु लक्षणं ॥ हि [illegible] योगेस्फुज [illegible] मम
[illegible] ॥ अणिमप्राप्त्या परैर्दृश्यत्वमंतर्धानं स्मृतिरतीतादिविषया [illegible] मनोवादेरिवस्मर
णं । कान्तिः कमनीयता दृष्टिः अतीतानागतविप्रकृष्टवस्तुदर्शनं श्रोत्रज्ञता अतिदूरस्य [illegible] शब्द सम
[illegible] तया श्रोत्रपथमनासेदुषां [illegible] ज्ञातृता । निजशरीरत्यागेन परशरीरप्रवेशनं [illegible] ३२
[illegible] लक्षणं लिंगं ॥ नैव दर्शनं द्वैत प्रयोजनं किंतु ॥ सि

योनिं व्रजंति ॥ एतन्मार्गद्वयाप्रवृत्तो यो न विजानाति मार्गद्वयोपायभूतं धर्मानुष्ठानं न करोति सोऽदंदश
कृमिकीटो वा भवेत् ॥ उपासनाप्रकारमाह ॥ ऊर्ध्वस्योत्तानचरणः सव्ये न्यस्येतक
को भुजंगः शलभः न्नास्यमुखं विष्टभ्य चोरसा ॥ निमीलिताक्षः सत्वस्थो दंतैर्दंतान्नसंस्पृशन् ॥ तालु
रं उत्तानं किंचि सुनिश्चलः ॥ सन्निरुध्येंद्रियग्रामं नातिनीचोच्छ्रितासनः ॥ द्विगुणं त्रि
स्था चलजिह्वश्च संवृतास्यः सुनिश्चलः ॥ ततो ध्येयः स्थितो योऽसौ हृदये दीपवत्प्रभुः ॥ धारयेत्तत्र चात्मानं धा
गुणं वापि प्राणायाममनुक्रमात् ॥ चरणौ यस्य स तथोक्तो बद्धपद्मासनः ॥ तथोत्ताने सव्ये दक्षिण
रणां धारयेद्बुधः ॥ ऊर्ध्वस्य उत्तानौ चरणौ विष्टभ्य स्तंभयित्वा तथा निमीलिताक्षः सत्वस्थः का
मुत्तानमास्यमुखं च किंचिदुन्नाम्योरसा च तथा तालुनि स्थिताऽचलजिह्वा यस्य स तथोक्तः ॥ त
मःक्रोधादिरहितो दंतैर्दंतान् संस्पर्शयन् तथा सम्यगिंद्रियसमूहं विषयेभ्यः प्रत्याहृत्य नातिनी
चासंवृतास्यः पिहिताननः सुनिश्चलो निष्कंपः तथा चित्तविक्षेपो न भवति तथोपविष्टः सन् द्विगुणं त्रिगुणं वा प्राणाया
चासनो नात्युच्छ्रितासनो यथा चित्तविक्षेपो न भवति योगिना योऽसौ हृदये दीपवदप्रकंपः प्रभुः स्थितोऽसौ ध्या
मामथ्या सम्यक्क्रमेण ततो वशीकृतपवनेन योगिना

शोकासूयावमानेर्ष्यामात्सर्यादिमयस्तथा ५ मानसोपि द्विजश्रेष्ठ तापो भवति नैकधा ॥ इत्येवमादिभिर्भेदैस्तापो
वि॰पु॰ ह्याध्यात्मिकः स्मृतः ६ मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ॥ सरीसृपाद्यैश्च नृणां जन्यते चाधिभौ
तिकः ७ शीतोष्णवातवर्षांबुवैद्युतादिसमुद्भवः ॥ तापो द्विजवरश्रेष्ठ कथ्यते चाधिदैविकः ८ गर्भजन्म
३२ जराज्ञानमृत्युनारकजं तथा ॥ दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ९ सुकुमारतनुर्गर्भे जंतुर्बहुमलावृ
तः ॥ उल्बसंवेष्टितो भुग्नपृष्ठग्रीवास्थिसंहतिः १० अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः ॥ अतिता
पिभिरत्यर्थं वर्द्धमानातिवेदनः ११ प्रसारणाकुंचनादौ नांगानां प्रभुरात्मनः ॥ शकृन्मूत्रमहापंकशायी सर्व
30 त्र पीडितः १२ निरुच्छ्वासः सचैतन्यः स्मरन्जन्मशतान्यथा ॥ आस्ते गर्भेतिदुःखेन निजकर्मनिबंधनः
१३ अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ॥ क्लेशान्निःक्रांतिमाप्नोति जठरान्मातुरातुरः १४ मूर्छाम
वाप्य महतीं संस्पृष्टो बाह्यवायुना ॥ विज्ञानभ्रंशमाप्नोति जातश्च मुनिसत्तम १५ कंटकैरिव तुन्नांगः क्र राम
कचैरिव दारितः ॥ पूतिव्रणान्निपतितो धरण्यां कृमिको यथा १६ कंडूयने वाप्यशक्तः परिवर्त्तेप्यनी ३२
श्वरः ॥ स्नानपानादिकाहारमवाप्नोति परेच्छया १७ अशुचिःस्रस्तरे सुप्तः कीटदंशादिभिस्तथा ॥ भक्ष

द्वेषोगेत्यजं देहं मम्रतत्त्वाय कल्पते ॥ ब्रह्मत्वमाप्नुयेच भवति ॥ पन्हनाय संभवे सत्वशुद्ध्युपायांतरमाह ॥ अ
थवाप्यथ्यसन्नेदं स्मालके मलं तेवसन् ॥ अथा चिन्तारी मितभुक्परं सिद्धिमवाप्नुयात् ॥ अथवा भक्तिकाम्य
निषिद्धकर्मत्याग मंवेद्भ्यसनशीलो ॥ चित्तमिताशनोपारि तमत्व शुद्धिरात्मोपासनेन परां
मुक्तिलक्षणां सिद्धिं प्राप्नोति ॥ किंच ॥ न्यायागतधनस्तत्त्वज्ञाननिष्ठोतिथिप्रियः ॥ श्राद्धकृत्सत्यवा
दीच गृहस्थोपि विमुच्यते ॥ सत्प्रतिग्रहादिमा न्यायेनोपार्जितधनोतिथिपूजातत्परो नियमनैमित्तिकश्राद्धानु
ष्ठाननिरतः सत्यवदनशीलः सन्नात्मतत्त्वध्याननिरतो गृहस्थोपि हि यस्मान्मुक्तिमवाप्नोति तस्मान्न
केवलमैहिकपारिव्राज्यपरं हि एव मुक्तिसाधनम् ॥ इति याज्ञवल्क्यमिताक्षरा अध्यात्मप्रकरणं ॥ ॥
ग ॥ श्रीपराशर उवाच ॥ आध्यात्मिकादि मैत्रेय ज्ञात्वा तापत्रयं बुधः ॥ उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम्
॥ आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा ॥ शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ॥ ॥ शिरोरोगप्र
तिश्यायज्वरशूलभगंदरैः ॥ गुल्मार्शःश्वासश्वयथुच्छर्दिभिरनेकधा ॥ तथाक्षिरोगातीसारकुष्ठाद्या गग
मयसंज्ञकैः ॥ भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥ कामक्रोधभयद्वेषलोभमोहविषादजः ॥ शोका

वि.पु. दीभवछ्रोत्रनेत्रः स्रवल्लीलाविलाननः २९ अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः ॥ तत्क्षणेप्यनु
३४ भूतानामस्मर्त्ताखिलवस्तुनाम् ३० सकृदुच्चरिते वाक्ये समुद्भूतमहाश्रमः ॥ श्वासकासमहायाससमुद्
भूतप्रजागरः ३१ अन्येनोत्थाप्यतेन्येन तथा संवेश्यते जरी ॥ भृत्यात्मपुत्रदाराणामपमानपराहतः ३२ प्रक्षी
णाखिलशौचश्च विहाराहारसस्पृहः ॥ हास्यः परिजनस्यापि निर्विण्णाशेषबान्धवः ३३ अनुभूतमिवान्य
स्मिन्जन्मन्यात्मविचेष्टितम् ॥ संस्मरन्यौवने दीर्घं निःश्वासित्यतितापितः ३४ एवमादीनि दुःखानि जरायाम
नुभूय वै ॥ मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि ३५ श्लथग्रीवांघ्रिहस्तोथ व्याप्तो वेपथुना भृशं
मुहुर्ग्लानिपरश्चैव मुहुर्ज्ञानलवान्वितः ३६ हिरण्यधान्यतनयभार्याभृत्यगृहादिषु ॥ एते कथं भवि
३२ ष्यंतीत्यतीव ममताकुलः ३७ मर्मभिद्भिर्महारोगैः क्रकचैरिव दारुणैः ॥ शरैरिवान्तकस्योग्रैश्छिद्यमाना
स्थिबंधनः ३८ विवर्त्तमानताराक्षी हस्तपादं मुहुः क्षिपन् ॥ संशुष्यमाणताल्वोष्ठकंठो घुरुघुरायते ३९
निरुद्धकंठदोषाद्धेरुदानः श्वासपीडितः ॥ तापेन महता व्याप्तस्तृषावार्त्तस्तथा क्षुधा ४० क्लेशादुत्क्रां एम
तिमाप्नोति याम्यकिंकरपीडितः ॥ ततश्च यातनादेहं क्लेशेन प्रतिपद्यते ४१ एतान्यन्यानि चोग्राणि दुःखा ३४
नि मरणे नृणां ॥ शृणुष्व नरके यानि प्राप्यन्ते पुरुषैर्मृतैः ४२ याम्यकिंकरपाशादिग्रहणं दंडताडनं ॥ यम

माणोपि नैवेषां समर्थो विनिवारणे १९ जन्मदुःखान्यनेकानि जन्मनोनंतराणि च ॥ बालभावे यदाप्नो
ति आधिभौमादिकानि च ॥ २० अज्ञानतमसाछन्नो मूढांतःकरणो नरः ॥ न जानाति कुतः कोहं क्वा
हं गंता किमात्मकः २१ केन बंधेन बद्धोहं कारणं किमकारणम् ॥ किं कार्यं किमकार्यं वा किं वाच्यं
किं च नोच्यते २२ को धर्म्मः कश्च वै धर्म्मः कस्मिन्वर्त्तेत वा कथं ॥ किं कर्तव्यमकर्त्तव्यं किं वा किं गुणा
दोषवत् २३ एवं पशुसमैर्मूढैरज्ञानप्रभवं महत् ॥ अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः २४ अज्ञा
नं तामसो भावः कार्यारंभप्रवृत्तयः ॥ अज्ञानिनां प्रवर्त्तंते कर्म्मलोपास्ततो द्विज २५ नरकं कर्म्म
णां लोपात्फलमाहुर्महर्षयः ॥ तस्मादज्ञानिनां दुःखमिह वामुत्र चोत्तमम् २६ जराजर्जरदेहश्च
शिथिलावयवः पुमान् ॥ विगलच्छीर्णदशनो वलीस्नायुःशिरावृतः २७ दूरप्रनष्टनयनो व्योमां
तर्गततारकः ॥ नासाविवरनिर्यातरोमपुंजश्चलद्वपुः २८ प्रकटीभूतसर्वास्थिर्नतपृष्ठास्थिसंह
तिः ॥ उत्सन्नजठराग्नित्वादल्पाहारोल्पचेष्टितः २९ चंक्रमणोत्थानशयनासनचेष्टितः ॥ सं

ति

ना २

विसवे सुखेवापि कर्मकृत्वा निवेदयेत् ॥ यामसुः फलस्पृहा त्यक्त्वा कर्मकिं यतेन भिः । योगः संप्राप्यते ज्ञानं योगो धर्मस्य लक्षणं ॥ योग
विसवे सुखेवापि कर्मकृत्वा निवेदयेत् ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणं
परं त योनिस्तस्मा द्युक्तः सदा भवेत् ॥ यत्करोषि यदश्नासि
विमुक्तिप्राप्तये प्राप्यासौ तत्कृत्सुखं नृणाम ५३ तदसंप्राप्तिविधः स्याः पिंडः स्वजातस्य पंडितैः ॥ गर्भजन्मजराद्येषु
विषु
स्थानेषु प्रभविष्यतः ५४ निरस्तातिशयाह्लादसुखभावैकलक्षणम् ॥ भेषजं भगवत्प्राप्तिरेकांतात्यंतिकी मता
३५
ता ५५ तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पंडितैर्नरैः ॥ तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने ५६ आगमोत्थं
विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥ शब्दब्रह्मागममयं परं ब्रह्म विवेकजं ५७ अंधं तम इवाज्ञानं दीपवच्चेंद्रियोद्भ
वम् ॥ यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम् ५८ मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम ॥ तदेतच्छ्रूय
तामत्र संबंधे गदतो मम ५९ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥ शब्दब्रह्मणि निष्णातः परं ब्रह्माधिग
च्छति ६० द्वे विद्ये वेदितव्ये वै इति चाथर्वणी श्रुतिः ॥ परया त्वक्षरप्राप्तिरृग्वेदादिमयापरा ६१ यत्तदव्य २
32 क्तमजरमचिंत्यमजमव्ययं ॥ अनिर्देश्यमरूपं च पाणिपादाद्यसंयुतं ६२ विभुं सर्वगतं नित्यं भूतयोनिम
कारणं ॥ व्याप्य व्याप्यं यतः सर्वं तद्वै पश्यंति सूरयः ६३ तद्ब्रह्म परमं धाम तद्ध्येयं मोक्षकांक्षिणः ॥ श्रुति
वाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ६४ तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ॥ वाचको भगवच्छब्द राम
स्तस्याद्यस्याक्षयात्मनः ६५ एवं निगदितार्थस्य स तत्त्वं तस्य तत्त्वतः ॥ ज्ञायते येन तज्ज्ञानं परमं यत्र ३५
नित्यनैमित्तिकैरेवकुर्वाणो दुरितक्षयं ॥ ज्ञानं च विमलीकुर्वन्नभ्यासेनैव पालयेत् ॥ अभ्यासात्पक्व विज्ञानः कैवल्यं लभते नरः

स्पदर्शनं चोग्रमुग्रमार्गविलोकनं ४३ करंभवालुकावह्नियंत्रभंगादिभीषणैः॥ अन्ये कनेके पाच्यमानना
द्विजदुःसहा ४४ क्रकचैः पाट्यमानानां मूषायां चापि धाम्यतां॥ कुठारैः कृत्यमानानां भूमौ चापि निख
न्यतां ४५ शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रवेश्यतां॥ गृध्रैः संभक्ष्यमाणानां द्वीपिभिश्चोपभुज्यतां ४६
क्वाथ्यतां तैलमध्ये च क्लिद्यतां क्षारकर्दमे॥ उच्चान्निपात्यमानानां क्षिप्यतां क्षेपयंत्रकैः ४७ नरके यानि दुःखा
नि पापहेतूद्भवानि वै॥ प्राप्यंते नारकैर्विप्र तेषां संख्या न विद्यते ४८ न केवलं द्विजश्रेष्ठ नरके दुःखपद्ध
तिः स्वर्गेपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः ४९ पुनश्च गर्भे भवति जायते च पुनर्नरः॥ गर्भे विलीय
ते भूयो जायमानोस्तमेति च ५० म्रियते जातमात्रश्च बालभावेथ यौवने॥ मध्यमं वा वयः प्राप्य वा
र्द्धके वा ध्रुवा मृतिः ५१ यावज्जीवति तावच्च दुःखैर्नानाविधैः प्लुतः॥ तंतुकारणपक्ष्मौघैरास्ते कार्पा
ग सबीजवत् ५२ द्रव्यनाशे तथोत्पत्तौ पालने च तथा नृणाम्॥ भवंत्यनेकदुःखानि तथैवेष्टविपत्तिषु॥
यद्यत्प्रीतिकरं पुंसां वस्तु मैत्रेय जायते॥ तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति ५४ कलत्रपुत्रमित्रादि
गृहक्षेत्रधनादिकैः॥ क्रियते न तथा भूरि सुखं पुंसां यथासुखं ५५ इति संसारदुःखार्कतापतापितचेतसाम्

/
मुनेश्च नीतः ८१ अतीतसर्वकरणोखिलात्मा तेनास्तितं पंङ्कुवनांतराले ॥ समस्तकल्याणगुण
वि॰पु॰ त्मको हि स्वशक्तिलेशावृतभूतसर्गः ८२ इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितो
३६ सौ ॥ तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः ८३ परःपराणां सकला नयत्र
क्लेशादयः संति परावरेशे ॥ सईश्वरो व्यष्टिसमष्टिरूपो व्यक्तस्वरूपः प्रकटस्वरूपः ८४ सर्वेश्वरः स ८
र्वदृक्सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः ॥ संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरू
पम् ८५ संदृश्यते वाप्यवगम्यते वा तज्ज्ञानमज्ञानमतोन्यदुक्तम् ॥ इति श्रीविष्णुपुराणे षष्ठे
ंशे पंचमोध्यायः ५ श्रीपराशरउवाच ॥ स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः ॥ तत्प्राप्तिका
33 रणं ब्रह्म तदेतदिति पठ्यते १ स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् ॥ स्वाध्याययोगसं
पत्त्या परमात्मा प्रकाशते २ तदीक्षणाय स्वाध्यायश्चक्षुर्योगस्तथापरम् ॥ नमांसचक्षुषा द्र एम
ष्टुं ब्रह्मभूतः सशक्यते ३ मैत्रेयउवाच ॥ भगवंस्तमहं योगं ज्ञातुमिच्छामि तं वद ॥ ज्ञाते यत्राखि ३६
लाधारं पश्येयं परमेश्वरम् ४ श्रीपराशरउवाच ॥ यथा केशिध्वजः प्राह खांडिक्याय महात्मने

दीमयम ६९ अग्राह्यगोचरस्यापि तस्य वै ब्रह्मणो द्विज।। पूजायां भगवच्छब्दः।। शुद्धे महाविभूत्याख्ये परे
ब्रह्मणि वर्त्तते ७० मैत्रेय भगवच्छब्दः सर्वकारणकारणे।। संभर्त्तेति तथा भर्त्ता भकारोर्थद्वयान्वितः ७१
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने।। ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ७२ ज्ञानवै
राग्ययोश्चैव षण्णां भग इतीरणा।। वसंति तत्र भूतानि भूतात्मन्यखिलात्मनि ७३ स च भूतेष्वशेषे
षु वकारार्थस्ततोव्ययः।। एवमेष महाशब्दो भगवानिति सत्तम ७४ परमब्रह्मभूतस्य वासुदेवस्य ना
न्यतः।। तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ७५ शब्दोयं नोपचारेण अन्यत्र ह्युपचारतः।।
उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम ७६ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ७६ ज्ञानशक्ति
बलैश्वर्यवीर्यतेजांस्यशेषतः ७७ भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः।। सर्वाणि तत्र भू
तानि वसंति परमात्मनि ७८ भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः।। खाण्डिक्यजनकायाह पृष्टः के
शिध्वजः पुरा ७९ नामव्याख्यामनंतस्य वासुदेवस्य तत्त्वतः।। भूतेषु वसते सोंतर्वसंत्यत्र च तानि यः
८० धाता विधाता जगतां वासुदेवस्ततः प्रभुः।। स सर्वभूतप्रकृतिं विकारान्गुणांश्च दोषांश्च

प्याहतस्त्वया मुने १६ न करोत्त्वं वैवाहं नवान्नः सांप्रतं भुवि ॥ त्वमेक एव तव शत्रुः खांडिक्यो यो
जितस्त्वया १७ सवाहनं त्वजाम्येष पृष्टो मोक्षरिपुर्मुने ॥ मान एव समायज्ञो यदि मां सह निष्पत्ति
वि॰पु॰ १८ आगम्य च्छित्तं तस्य दृष्टो वदिष्यति रिपुर्मम ॥ ततस्त्वाविकलेः पापो मुनि निग्रह भविष्यति १९
३२ श्रीपराशर उवाच । इत्युक्त्वा रथमारुह्य कृष्णाजिनधरो नृपः ॥ वनं जगाम यत्रास्ते खांडिक्यः सम
हारमतिः २० तमायांतं समालोक्य खांडिक्यो रिपुमात्मनः ॥ सोऽपि चक्रे धनुस्सज्यं समारोपित
कार्मुकः २१ खांडिक्य उवाच कृष्णाजिनं त्वं कवचमाबध्यास्मान्निहंस्यसि ॥ कृष्णाजिनधरो वित
34 हिं न मयि प्रहरिष्यति २२ मृगाणां वद पृष्ठेषु मूढ कृष्णाजिनं न वै किं मम ॥ येषां मया त्वया चो राम
ग्राः प्रहिताः शितसायकाः २३ सोऽहं त्वां हनिष्यामि न मे जीवन्विमोक्ष्यसे ॥ आततायसि दु
र्बुद्धे मम राज्यहरो रिपुः २४ केशिध्वज उवाच खांडिक्य संशयं प्रष्टुं भवन्तमिह मागतम् ॥ न ३२
त्वां हंतुं विचार्यैतत्कोपं बाणं च मुंच वा २५ श्रीपराशर उवाच ततः स मंत्रिभिः सार्द्धमेकांते स

जनकाय पुरा योगं तथाहं कथयामि ते ५ मैत्रेय उवाच ॥ खांडिक्यः कोऽभवद्ब्रह्मन् को वा केशिध्वजोऽभ
वत् ॥ कथं तयोश्च संवादो योगसंबंधवानभूत् ६ श्रीपराशर उवाच ॥ धर्म्मध्वजो वै जनकस्तस्य पु
त्रोऽमितध्वजः ॥ कृतध्वजश्च नामासीत्सदाध्यात्मरतिर्नृपः ७ कृतध्वजस्य पुत्रोऽभूत्ख्यातः केशिध्व
जो द्विज ॥ पुत्रोऽमितध्वजस्यापि खांडिक्यो जनकोऽभवत् ८ कर्म्ममार्गेऽपि खांडिक्यः पृथिव्यामभ
वत्पती ॥ केशिध्वजोऽप्यतीवासीदात्मविद्याविशारदः ९ तावुभावपि चैवास्तां विजिगीषू पर
स्परम् ॥ केशिध्वजेन खांडिक्यः स्वराज्यादवरोपितः १० पुरोधसा मंत्रिभिश्च समवेतोऽल्पसाधनः
राज्यान्निराकृतः सोऽथ दुर्गारण्यचरोऽभवत् ११ इयाज सोऽपि सुबहून्यज्ञान्ज्ञानव्यपाश्रयः
ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया १२ एकदा वर्त्तमानस्य यागे योगविदां वरः ॥ धर्म्मधे
नुं जघानोग्रः शार्दूलो द्विजसत्तम १३ ततो राजा हतां ज्ञात्वा धेनुं व्याघ्रेण ऋत्विजः ॥ प्रायश्चित्तं
स पप्रच्छ किमत्रेति विधीयते १४ ते चोचुर्न वयं विद्मः कशेरुः पृच्छ्यतामिति ॥ कशेरुरपि तेनोक्त
स्तथैव प्राह भार्गवम् १५ शौनकं पृच्छ राजेंद्र नाहं वेद्मि स वेत्स्यति ॥ स गत्वा तमपृच्छच्च सो

चैवार्थिजनो ऽप्यर्थ्यो जितो ऽमितो मया २६ येनाहमस्य लोकस्य मया सर्वं विचेष्टितम् ॥ अनि
वि॰पु॰ ष्पन्नक्रियं चेतस्तथापि मामकं यथा २७ इत्येवं चिन्तयन्नेव संसारं स महीपतिः ॥ खांडिक्यायनद
३८ त्तेति मपावेगुरुदक्षिणा २८ स जगाम ततो भूपो रथमारुह्य पार्थिवः ॥ मैत्रेय दुर्गगहनं खांडि
कोपत्र संस्थितः २९ खांडिक्योपि जमायांतं पुनर्दृष्ट्वा धृतायुधः ॥ तस्योहंतुं कृतमतिस्तथाहस
पुनर्नृपः ४० भोनाहं ते पकाराय प्राप्तः खांडिक्य मा क्रुधः ॥ गुरोर्निष्क्रयदानाय मामवेहि माग त
तं ४१ निष्पादितो मया यागः सम्यक त्वदुपदेशतः ॥ सोहं ते दातुमिच्छामि वृणुष्व गुरुदक्षिणां
35 ४२ श्री पराशर उवाच ॥ भूयः स मंत्रिभिः सार्धं मंत्रयामास पार्थिवः ॥ गुरुर्निष्क्रतिकामोत्र किम
यं प्रार्थ्यतामिति ४३ तमूचुर्मंत्रिणो राज्यमशेषं प्रार्थ्यतामयं ॥ कृतिभिः प्राप्यते राज्यमना
यासितं सैनिकैः ४४ प्रहस्य तानाह नृपः स खांडिक्यो महामतिः ॥ स्वल्पकालं महीराज्यं मादृ
शैः प्राप्यते कथम् ४५ एवमेतद्भवंतोत्र सर्वं साधनमंत्रिणः ॥ परमार्थः कथं कोत्र यूयं नात्र राम
विचक्षणाः ४६ श्री पराशर उवाच इत्युक्त्वा समुपेत्यैनं स तु केशिध्वजं नृपः ॥ उवाच किमवश्यं ३८

पुरोहितः ॥ मंत्रयामास खांडिक्यः सर्वैरेव महामतिः २६ न मृत्युर्मे त्रिणेवध्यो रिपुरेष वशंगतः
हते तस्मिन्पृथिवी सर्वा तव वश्या भविष्यति २७ खांडिक्यस्त्वाह तान्सर्वानेतदेव न संशयः ॥ हते
तु पृथिवी सर्वा मम वश्या भविष्यति २८ परलोकजयस्तस्य पृथिवी सकला मम ॥ न हन्मि नं
चेल्लोकजयो मम तस्य वसुंधरा २९ परलोकजयोनंतः स्वल्पकालो महीजयः ॥ तस्मान्नैनं
हनिष्ये यत्पृच्छति वदामि तत् ३० श्रीपराशर उवाच ततस्तमभ्युपेत्याह खांडिक्यजनको रिपुं
न प्रष्टव्यं यत्त्वया सर्वं तत्पृच्छस्व वदामि ते ३१ ततः सर्वं यथावृत्तं धर्मधेनुवधं द्विज ॥ कथयि
त्वा स पप्रच्छ प्रायश्चित्तं हि तद्गतं ३२ स चाचचक्षे यथान्यायं द्विज केशिध्वजाय तत् ॥ प्रायश्चि
त्तमशेषेण यद्वै तत्र विधीयते ३३ विदितार्थः स तेनैव अनुज्ञातो महात्मना ॥ यागभूमिमु
पागम्य चक्रे सर्वाः क्रियाः क्रमात् ३४ क्रमेण विधिवद्यागं नीत्वा सोवभृथाप्लुतः ॥ कृतकृ
त्यस्ततो भूत्वा चिंतयामास पार्थिवः ३५ पूजिताश्च द्विजाः सर्वे सदस्या मानिता मया ॥ त

वि·पु
३६

36

अहमेतदितीमुच्चैः कुरुतेकुमतिर्मतिम् १२ आकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थिते ॥ आत्मन्यात्मम
यंभावंकः करोतिकलेवरे १३ कलेवरोपभोग्यंहि गृहक्षेत्रादिकंचयः ॥ अदेहेह्यात्मनिप्राज्ञोममेदमिति
मन्यते १४ इत्थंचपुत्रपौत्रेषुतद्देहोत्पादितेषुकः ॥ करोतिपण्डितःस्वाम्यमनात्मनिकलेवरे १५ सर्वंदे
होपभोगायकुरुतेकर्ममानवः ॥ देहश्चान्योयदापुंसस्तदाबंधायतत्परम् १६ मृन्मयंचयथागेहंलि
प्यतेवैमृदम्भसा ॥ पार्थिवोयंतथादेहोमृदंभोलेपनस्थितिः १७ पंचभूतात्मकैर्भोगैःपंचभूतात्मकंवपुः
आप्यायतेयदिततःपुंसोभोगोत्रकिंकृतः १८ अनेकजन्मसाहस्रींसंसारपदवींव्रजन् ॥ मोहश्रमंप्रया
तोसौवासनारेणुगुंठितः १९ प्रक्षाल्यतेयदासोस्यरेणुर्ज्ञानोष्णवारिणा ॥ तदासंसारपांथस्यया
तिमोहश्रमःशमम् २० मोहश्रमेशमंयातेस्वच्छांतःकरणःपुमान् ॥ अनन्यातिशयाबाधंपरंनिर्वाण
मृच्छति २१ निर्वाणमयएवायमात्माज्ञानमयोमलः ॥ दुःखाज्ञानमलाधर्माःप्रकृतेस्तेतुनात्मनः २२ राम
जलस्यनाग्निसंसर्गःस्थालीसंगात्तथापिहि ॥ शब्दोद्रेकादिकान्धर्मान्तत्करोतियथामुने २३ तथात्मा
प्रकृतेःसंगादहंमानादिदूषितः ॥ भजतेप्राकृतान्धर्मानन्यस्तेभ्योहिसोव्ययः २४ तदेतत्कथितंबीज ३६
मविद्यायास्तवप्रभो ॥ क्लेशानांक्षयकरंयोगादन्यन्नविद्यते २५ खांडिक्यउवाच ॥ तंब्रवीहिमहाभा

९९

त्वं ददासि गुरुदक्षिणां ४० बाहुमित्रे वर्त्तते नो क्लान्तं खाण्डिक्यसत्तम यथावदीत ॥ भवानध्यात्मविज्ञानपरमार्थविचक्ष
णः ४१ यदि चेदीप्सितं मत्तः संभवता गुरुनिष्क्रयः ॥ तत्क्लेशप्रशमायालं यत्कर्म तदुदीरय ४२ इति श्री विष्णुपु
राणे षष्ठेंशे षष्ठोऽध्यायः ६ केशिध्वज उवाच ॥ न प्रार्थितं त्वया कस्मान्मम राज्यमकंटकं ॥ राज्यलाभाद्विनान्यत्
क्षत्रियाणामतिप्रियम् १ खाण्डिक्य उवाच ॥ केशिध्वज निबोध त्वं मया न प्रार्थितं यतः ॥ राज्यमेतद्दुराशैर्यत्तत्र गृध्यं
त्यपंडिताः २ क्षत्रियाणामयं धर्मो यत्प्रजापरिपालनं ॥ वधश्च धर्मयुद्धेन स्वराज्यपरिपंथिनां ३ यत्राशक्तेस
मे दोषो नैवास्त्यपहृते त्वया ॥ बंधायैव भवत्येषा अविद्याप्यक्रमोज्झिता ४ जन्मोपभोगलिप्सार्थमियं परराज्यस्
पृहा मम ॥ अन्येषां दोषजा नैषा धर्ममेवानुरुध्यते ५ न याच्ञा क्षत्रबंधूनां धर्मोल्लंघितस्सनातन ॥ अतो न या
चितं राज्यमविद्यांतर्गतं तव ६ राज्ये गृध्नंत्यविद्वांसो ममत्वाहतचेतसः ॥ अहंमानमहापानमदमत्ता न मा
दृशाः ७ श्रीपराशर उवाच ॥ ततः प्रहृष्टः साध्विति प्राह केशिध्वजो नृपः ॥ खाण्डिक्यजनकं प्रीत्या श्रूयतां व
चनं मम ८ अहमप्यविद्यया मृत्युं तर्तुकामः करोमि वै ॥ राज्यं यागांश्च विविधान्भोगैः पुण्यक्षयं तथा ९ तदि
दं ते मनो दिष्ट्या विवेकैश्वर्यतां गतं ॥ श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनंदन १ अनात्मन्यात्मबुद्धिर्या अ
स्वे स्वमिति या मतिः ॥ अविद्यातरुसंभूतिबीजमेतद्द्विधा स्थितम् ११ पंचभूतात्मके देहे देही मोहतमोवृतः ॥

सापत्रा द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते ६८ अमूर्त्तं ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः
वि॰पु॰ समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ६९ तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्महत् समस्तश
क्तिरूपाणि तत्करोति जनेश्वर ७० देवतिर्य्यङ्मनुष्यादिचेष्टावंति स्वलीलया जगतामुपका
४२ राय न सा कर्मनिमित्तजा ७१ चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका तद्रूपं विश्वरूपस्य
तस्य योगयुजा नृप ७२ चिंत्यमात्मविशुध्यर्थं सर्वकिल्बिषनाशनं यथाग्निरुद्धतः शिखः
37 कक्षं दहति सानिलः ७३ तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषं तस्मात्समस्तशक्ती
नामाधारे तत्र चेतसः ७४ कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा शुभाश्रयः स चित्तस्य
७५ सर्वगस्य तथात्मनः त्रिभावभावनातीतो मुक्तये योगिनां नृप अन्ये तु पुरुषव्याघ्र चेतसो ये व्य
पाश्रयाः ७६ अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः मूर्त्तं भगवतो रूपं सर्वापाश्रयनिस्पृहम् राम
७७ एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते तच्च मूर्त्तं हरे रूपं यादृक्चिंत्यं नराधिप ७८ तच्छ्रू ४२

पशवः शैलाः समुद्राः सरितो द्रुमाः ५७ भूप यान्यशेषाणि भूतानां ये च हेतवः प्रधानादिविशे
षांतं चेतनाचेतनात्मकं ५८ एकपादं द्विपादं च बहुपादमपादकम् मूर्त्तमेतद्धरेरूपं भावनात्रित
यात्मकं ५९ एतत्सर्वमिदं विश्वं जगदेतच्चराचरम् परब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम्
६० विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ६१ य
या क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा संसारतापानखिलानवाप्नोत्यनुसंततान् ६२ तया तिरो
हितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता सर्वभूतेषु भूपाल तारतम्येन लक्ष्यते ६३ अप्राणवत्सु स्व
ल्पा सा स्थावरेषु ततोधिका सरीसृपेषु तेभ्योन्यैरप्यतिशयेन पतत्रिषु ६४ पतत्रिभ्यो मृगास्तेभ्यः
स्वशक्त्या पशवोधिकाः पशुभ्यो मनुजाश्चाति शक्त्या पुंसः प्रभाविताः ६५ तेभ्योपि नागगंधर्वय
क्षाद्या देवसत्तमाः शक्रः समस्तदेवेभ्यस्ततश्चाति प्रजापतिः ६६ हिरण्यगर्भोपि ततः पुंसः श
क्त्युपलक्षितः एतान्यशेषरूपस्य तस्य रूपाणि पार्थिव ६७ यतस्तच्छक्तियोगेन युक्तानि नभ-

वि·पु·
४३

38

नाहीनं स्वरूपग्रहणं हि यत् ८९ मनसा ध्याननिष्पाद्य समाधिः सोभिधीयते विज्ञानं प्रापकं
प्राप्ये परे ब्रह्मणि पार्थिव ९० प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः क्षेत्रज्ञः करणीज्ञानं कर
णं तेन तस्य तत् ९१ निष्पाद्य मुक्तिकार्यं वै कृतकृत्यो निवर्त्तते तद्भावभावनापन्नस्ततो सौ परमात्म
ना ९२ भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् विभेदजनके ज्ञाने नाशमात्यन्तिकं गते ९३ आ
त्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति इत्युक्तस्ते महायोगः खाण्डिक्य परिपृच्छतः ९४ संक्षेपविस्त
राभ्यां च किमन्यत् क्रियतां तव खाण्डिक्य उवाच कथिते योगसद्भावे सर्वमेव कृतं मम तवोपदेशेना
शेषो नष्टश्चित्तमलो यतः ९५ ममेति यन्मया चोक्तमसदेतन्न चान्यथा नरेन्द्र गदितुं शक्यम
पि विज्ञेयवेदिभिः ९६ अहं ममेत्यविद्येयं व्यवहारस्तथानयोः परमार्थस्त्वसंलापो गोचरो वचसां न
तः ९७ तद्गच्छ श्रेयसे सर्वं ममैतद्भवता कृतम यद्विमुक्तिप्रदो योगः प्रोक्तः केशिध्वज व्ययः ९८ रामः
४३
श्रीपराशर उवाच यथार्हपूजया तेन खाण्डिक्येन स पूजितः आजगाम पुरं ब्रह्मस्ततः केशिध्वजो न
पः ९९ खाण्डिक्योपि सुतं कृत्वा राजानं योगसिद्धये वनं जगाम गोविन्दे विनिवेशितमानसः १०० तत्रैकान्तमतिर्भूत्वा यमादिगुण

यताम्मनाधारधारणा नोपपद्यते प्रसन्नचारुवदनं पद्मपत्रोपमेक्षणम् ७९ सुकपोलं सुविस्तीर्णल
लाटफलकोज्ज्वलं समकर्णान्तविन्यस्तचारुकर्णविभूषणम् ८० कंबुग्रीवं सुविस्तीर्णश्रीवत्सांकित
वक्षसं वलीत्रिभंगिनामग्नेनाभिनाचोदरेण वै ८१ प्रलंबाष्टभुजं विष्णुमथवापि चतुर्भुजं समस्थि
तोरुजंघं च सुस्थिरांघ्रियुगांबुजम् ८२ चिंतयेद्ब्रह्मभूतं तु पीतनिर्मलवाससं किरीटचारुकेयू
रकटकादिविभूषितं ८३ शार्ङ्गशंखगदाखड्गचक्राक्षवलयान्वितं चिंतयेत्तन्मना योगी समाधाया
त्ममानसं ८४ तावद्यावद्दृढीभूता तत्रैव नृपधारणा व्रजतस्तिष्ठतोन्यद्वा स्वेच्छया कर्म कुर्वतः ८५ ना
पयाति यदा चित्तात्सिद्धां मन्येत तां तदा ततः शंखगदाचक्रशार्ङ्गादिरहितं बुधः ८६ चिंतयेद्भगव
द्रूपं प्रशांतं साक्षसूत्रकम् सा यदा धारणा तद्वदवस्थानवती ततः ८७ किरीटकेयूरमुखैर्भूषणै
रहितं स्मरेत् तदेकावयवं देवं चेतसा हि पुनर्बुधः ८८ कुर्यात्ततो वयविनि प्रणिधानपरो भवेत् तद्रू
पप्रत्ययैकाग्रा संततिश्चान्यनिस्पृहा ८९ तद्ध्यानं प्रथमैरंगैः षड्भिर्निष्पाद्यते नृप तस्यैव कल्प

गी·भ·
४४

39

योगी युंजीत सततमात्मानं रहसि स्थितः एकाकी यतचित्तात्मा निराशीरपरिग्रहः १०
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्त
रम ११ तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः उपविश्यासने युंज्याद्योगमात्मविशुद्धये
१२ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्
१३ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तो युक्त आसीत मत्परः १४ युंजन्नेवं
सदात्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति १५ नात्यश्नतस्तु यो
गोस्ति न चैकांतमनश्नतः न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन १६ युक्ताहारविहारस्य
युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहा १७ यदा विनियतं चित्तमा
त्मन्येवावतिष्ठते निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा १८ यथा दीपो निवातस्थो नें
गते सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योगमात्मनः १९ यत्रोपरमते चित्तं नि

रामकः
४४

१ चक्रेचानभिसंधिनं २ सक्तस्यापिभोगेष्ववीणपापोमलस्ततः अवाप्तिस्तमंतांनापत्तयफलास्तथा ३

इति श्रीविष्णुपुराणे ... पंचमोध्यायः ५

श्रीभगवानुवाच अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च योगी च न निरग्निर्न चाक्रि
यः १ यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव नह्यसंन्यस्तसंकल्पो योगी भवति कश्चन २ आ
रुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते ३ यदा हि नेंद्रि
यार्थेषु न कर्मस्वनुषज्जते सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ४ उद्धरेदात्मनात्मा
नं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ५ बंधुरात्मात्मनस्त
स्य येनात्मैवात्मना जितः अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६ जितात्मनः प्र
शांतस्य परमात्मा समाहितः शीतोष्णसुखदुःखेषु तथा मानापमानयोः ७ ज्ञानविज्ञा
नतृप्तात्मा कूटस्थो विजितेंद्रियः युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ८
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९

नापः पुनंति पापानि नरो लाभ्रापि निम्नगाः॥ आत्मा पुनाति पापानि यद्यपि पापानि वर्तते॥ आत्मैव यदि नात्मानं
महितेभ्यो निवारयेत्॥ को न्यो हितकरस्तस्मादात्मानं तारयिष्यति॥ इति महाभारते

सर्वदेवमयं लोके क्षिप्त केतमपु दृश्यापरे॥ समस्नान
पापस्य केवलात्मापि उरभ्रः॥ सोम भवति भारते

गी॰भ॰
४५

र्शनः २९ योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति तस्याहंनप्रणश्यामिसचमेनप्रणश्यति
३० सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः सर्वथावर्तमानोपिसयोगीमयिवर्तते ३१ आ
त्मौपम्येनसर्वत्रसमंपश्यतियोर्जुन सुखंवायदिवादुःखंसयोगीपरमोमतः ३२ अर्जुनउ
वाच योयंयोगस्त्वयाप्रोक्तःसाम्येनमधुसूदन एतस्याहंनपश्यामिचंचलत्वात्स्थितिंस्थिरां
३३ चंचलंहिमनःकृष्णप्रमाथिबलवद्दृढं तस्याहंनिग्रहंमन्येवायोरिवसुदुष्करम् ३४ श्रीभ
गवानुवाच असंशयंमहाबाहोमनोदुर्निग्रहंचलं अभ्यासेनतुकौंतेयवैराग्येणचगृह्य
ते ३५ असंयतात्मनायोगोदुःप्राप्यइतिमेमतिः वश्यात्मनातुयतता शक्योवाप्तुमुपायतः
३६ अर्जुनउवाच अयतिःश्रद्धयोपेतोयोगाच्चलितमानसः अप्राप्ययोगसंसिद्धिंकांगतिं रामः
कृष्णगच्छति ३७ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति अप्रतिष्ठोमहाबाहोविमू ४५

र
40

रुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति २० सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यम
तीन्द्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः २१ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते २२ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा २३ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः म
नसैवेंद्रियग्रामं विनियम्य समंततः २४ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं म
नः कृत्वा न किंचिदपि चिंतयेत २५ यतो यतो निश्चरति मनश्चंचलमस्थिरं ततस्ततो निय
म्यैतदात्मन्येव वशं नयेत २६ प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमम उपैति शांतरजसं ब्र
ह्मभूतमकल्मषम २७ युंजन्नेवं सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्पर्शमत्यंतं
सुखमश्नुते २८ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते योगयुक्तात्मा सर्वत्र समद

यतः सर्वाणि भूतानि भवंत्यादियुगागमे यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये॥

यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति॥ यो ब्रह्माणं विदधाति पू
यो॰सं॰ यश्चात्मनि तिष्ठन् सत्यंज्ञानमनंतं ब्रह्म॥ यः सर्वज्ञः सर्ववित्॥ इत्यादिश्रुतयस्तत्र प्रमाणं॥ विष्णोः
४६ सकाशात्संभूतं जगत्तत्रैव संस्थितम्॥ स्थितिसंयमकर्त्तासौ जगतोस्य जगच्च सः॥ नारायणपराव्य
क्तादंडमव्यक्तसंभवं॥ अंडस्यांतस्त्विमे लोकाः सप्तद्वीपा च मेदिनी॥ इत्यादिस्मृतयः॥ एवंभूतादी
42 श्वरादाकाशस्संपद्यते॥ आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी च॥ आत्मन आका
सं शस्संभूत इत्यादिश्रुतेः॥ मायायाः सत्वरजस्तमोगुणात्मकत्वात्॥ तत्कार्याण्याकाशादीन्यपि सत्वर
जस्तमोगुणात्मकानि॥ अपंचीकृतानि तन्मात्राणि भूतानीति च वर्णयंति॥ एतेभ्यः सूक्ष्मभूतेभ्यः स्थू
लभूतानि स्थूलशरीराणि च सप्तदश लिंगात्मकानि जायंते॥ सप्तदश लिंगानि तु ज्ञानेंद्रियाणि
पंच कर्मेंद्रियाणि पंच मनोबुद्धिः पंच प्राणाश्चेति॥ आकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेंद्रि
याण्युत्पद्यंते॥ आकाशस्य सात्विकांशाच्छ्रोत्रमुत्पद्यते॥ वायोः सात्विकांशात्त्वगिंद्रियम्॥ तेजसः एम
सात्विकांशाच्चक्षुः॥ अपां सात्विकांशाद्रसनं॥ पृथिवीसात्विकांशात् घ्राणं॥ श्रोत्रमाकाशस्य ४६

ढो ब्रह्मणः पथि ३८ एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्युप
पद्यते ३९ श्रीभगवानुवाच ॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ न हि कल्याणकृत्कश्चिद्दु
र्गतिं तात गच्छति ४० प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ॥ शुचीनां श्रीमतां गेहे योग
भ्रष्टोभिजायते ४१ अथवा योगिनामेव कुले भवति धीमताम् ॥ एतद्धि दुर्लभतरं लोके जन्म
यदीदृशं ४२ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं ॥ यतते च ततो भूयः संसिद्धौ कुरुनंदन ४३ पूर्वा
भ्यासेन तेनैव ह्रियते ह्यवशोपि सः ॥ जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ४४ प्रयत्नाद्यतमा
नस्तु योगी संशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्धिस्ततो याति परां गतिम् ४५ तपस्विभ्योधि
को योगी ज्ञानिभ्योपि मतोधिकः ॥ कर्म्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्ज्जुन ४६ योगिना
मपि सर्वेषां मद्गतेनांतरात्मना ॥ श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ४७ इति श्रीभगव
द्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे आत्मसंयमयोगो नाम षष्टमोध्यायः

६९.५

कोशः॥कर्मेंद्रियैः सहितं मनः मनोमयकोशः॥ज्ञानेंद्रियैः सहिता बुद्धिर्विज्ञानमयकोशः॥अयमे
यो॰सं॰ वकर्तृत्वोपाधिः विज्ञानं यज्ञं तनुत इत्यादिश्रुतेः अंतःकरणस्य सत्ववृत्तिर्द्विविधा निश्चयवृत्तिः सु
४७ खाकारवृत्तिश्चेति॥निश्चयवृत्तिमदंतःकरणं बुद्धिरित्युच्यते॥सुखाकारवृत्तिमदंतःकरणं भोक्तृ
त्वोपाधिः॥तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः इत्यादिश्रुतेः॥अयमेव कारणपर्यंतं आनंदम
यकोशः केचित्तु अज्ञानमानंदमयकोशं वदंति इदं सूक्ष्मशरीरं सप्तदशलिंगं द्विविधं समष्टिव्यष्टि
भेदात् अपंचीकृतपंचमहाभूततत्कार्यं सप्तदशलिंगं समष्टिरित्युच्यते॥एतदुपहितं चै
42 तन्यं हिरण्यगर्भ इत्युच्यते प्राणः सूत्रात्मेति च ज्ञानक्रियाशक्तिमदुपहितत्वात् आप्यच्च अथ
वा पूर्वोक्ता पंचकृतभूतेभ्यः सर्वव्यापकं लिंगशरीरं पृथगेवोत्पन्नं तदेव समष्टिरित्युच्यते
समष्टित्वं नाम कोशादिवत् सर्वव्यापित्वं तु सूत्रत्वं तदुक्तं तेभ्यः समभवत्सूत्रं लिंगं सर्वात्मकं राम
महदिति केचित्तु वनवल्लिंगशरीरसमुदायः समष्टिं वदंति प्रत्येकं लिंगशरीरं व्यष्टिरित्युच्य ४७
ते व्यष्टित्वं नाम व्यक्तिवच्छावरत्वं॥एतदुपहितं चैतन्यं तैजस इत्युच्यते॥तेजोमयांतःक

रित्युते॥ आकाशादीनां सात्विकांशेभ्यो मिलितेभ्यो ऽन्तःकरणमुत्पद्यते॥ तत्संकल्पविकल्पनिश्चयाः॥
भिमानानुरूपवृत्तिभेदाच्चतुर्विधं मनोबुद्धिरहंकारश्चित्तं चेति चतुर्विधं॥ संकल्पात्मकं मनो रूपं बुद्धि
र्निश्चयरूपिणी॥ अभिमानात्मकस्त्वहंकारः प्रकीर्तितः॥ अनुसंधानरूपं चित्तमित्यभिधीयते
इति वार्त्तिकवचनात् पूर्वोक्ताकाशादीनां राजसांशेभ्यो व्यस्तेभ्यः कर्मेंद्रियाण्युत्पद्यंते॥ आकाशराजसां
शाद्वागिंद्रियमुत्पद्यते॥ वायुराजसांशाद्धस्तौ॥ तेजसो राजसांशात्पादौ॥ अपां राजसांशात्पायुः
पृथिवीराजसांशादुपस्थः॥ आकाशादिराजसांशेभ्यो मिलितेभ्यः प्राणउत्पद्यते सोपि भेदात्पंचवि
धः॥ प्रागमनवान्नासाग्रवर्त्ती प्राणः॥ अवागमनवान्पाय्वादिस्थानवर्त्ती ऽपानः॥ विष्वग्गमनवान्सर्व
शरीरवर्त्ती व्यानः॥ ऊर्ध्वगमनवान्कंठवर्त्ती उदानः॥ अशितपीतान्नपानादिसमीकरणकरः खि
लशरीरवर्त्ती समानः॥ वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि॥ तेषां क्रमेणाग्न्यादिस्तुते॥
अन्नमयप्राणमयमनोमयविज्ञानमयआनंदमयकोशाः पंच अत्रैवांतर्भवंति॥ वक्ष्यमाणस्थू
लशरीरमन्नमयशरीरः उक्तं सूक्ष्मशरीरं कोशत्रयात्मकं। कर्मेंद्रियैः सहितः प्राणः प्राणमय

नशरीरारंभकं प्रारब्धं कर्म संचितागामिकर्मणः फलभोगेन वा विरोधिकर्मांतरेण वा ब्रह्मज्ञानेन
यो॰सं॰ वा नाशः प्रारब्धस्य तु भोगेनैव नाशः किंबहुना प्रारब्धव्यतिरिक्तानामविद्यादीनां पंचक्लेशानां
४८ तत्वज्ञानान्नाशः तथाहि अविद्या अस्मिता रागद्वेषाभिनिवेशाः पंचक्लेशाः कार्यकारणरूपा द्वि
विधा विद्या निरूपिता अहंकारस्य सूक्ष्मावस्थास्मिता इदमेव महतत्वं सामान्याहंकार इति चोच्य
ते रागः उक्तः द्वेषः क्रोधः स्वीकृतस्य पुनस्त्यागासहिष्णुत्वमभिनिवेशः एतेषां पंचानां ब्रह्मसा
43 हात्कारान्निवृत्तिः ॥ ज्ञात्वा देवं मुच्यते सर्वपाशैरिति श्रुतेः पाशैः पंचक्लेशैरित्यर्थः तिष्ट
त तु तावदेतत्प्रासंगिकं एवं सूक्ष्मशरीरोत्पत्तिर्निरूपिता पंचीकृतभूतानि स्थूलभूतानि पंचीक
रणं तु पूर्वोक्तानामाकाशादीनां तामसांशानामेकैकं द्विधा विभज्य तत्र एकं चतुर्धा विभज्य स्वां राम
शपरित्यज्य इतरांशेषु योजनं ता॰ सां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत्करणश्रुतेः ४८
पंचीकरणस्याप्युपलक्षणत्वात् पंचीकरणप्रमाणमेव वैशेष्यात्तद्वादः इति न्यायेन

त्रि२

रणोपाधित्वात् सामान्यविशेषयोरिव जातिव्यक्त्योरिव वनसमष्टिव्यष्ट्योः तादात्म्यापन्नपरमात्म
डुपहितयोस्तैजससूत्रात्मनोरपि तादात्म्यम् एतदेव सूक्ष्मशरीरम् अविद्याकामकर्मसहितं पुर्य्य
ष्टकमित्युच्यते ॥ ज्ञानेन्द्रियपंचकं कर्मेन्द्रियपंचकं अन्तःकरणचतुष्टयं प्राणादिपंचकं भूतसू
क्ष्मपंचकं अविद्याकामकर्म चेति तान्यष्टौ तत्र कार्य्याविद्या दृष्टव्या सा चतुर्विधा: अनित्ये नित्य
त्वबुद्धिः अशुचौ शुचित्वबुद्धिः दुःखे सुखत्वबुद्धिः अनात्मन्यात्मबुद्धिश्चेति तदुक्तं अनित्याशुचि
दुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति अस्यार्थः अनित्ये ब्रह्मलोकादिसंसारफले नित्य
त्वबुद्धिरेका विद्या दृष्टव्या अशुचिषु स्वशरीरपुत्रभार्य्यादिशरीरेषु शुचित्वबुद्धिः परा दुःखे दुःखसा
धनेषु च सुखतत्साधनबुद्धिरन्याति अनात्मनि देहेन्द्रियादिषु अहमित्यात्मबुद्धिरिति एवं अविद्या च
तुर्विधा: कामो रागः कर्म त्रिविधं संचितमागामि प्रारब्धं चेति स्वकृतफलमदत्वा देहस्वरूपेणाविद्य
मानं संचितं कर्म यथा संध्यावंदनाग्निहोत्रादि आगामि अस्मिन्शरीरे क्रियमाणं कर्म वर्त्तमा

१

एवमुत्पन्नस्यास्य स्थूलकार्यस्य लयप्रकारमाह॥ स्मृतौ ... जगत्प्रतिष्ठा देवर्षे पृथिव्य
पो·सं· प्सु प्रलीयते ज्योतिष्यापः प्रलीयंते ज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्र
४९ लीयते अव्यक्तं पुरुषे ब्रह्मन् निष्कले संप्रलीयते इति एवमुक्तस्य संसारस्य स्वरूपमाह महाभा
रते युधिष्ठिरं प्रति भीष्मवाक्यं॥ प्रभाते तु मया तात नकर्तव्यं प्राणमोहणं॥ त्वरयंतीह मे प्राणा
मनाय सुरालयं॥ शांतिपर्वणि योधर्मो विस्तारेण प्रकीर्तितः॥ तं प्रवक्ष्यामि पत्नेन ...ण्वामित्र
44 विक्रमः॥ तस्य धर्मसमुद्रस्य शोभितस्य समंततः॥ नवनीतमिवोद्धृत्य सारं तस्य वदाम्यहं॥ संस
रस्य तु स्वरूपं दृश्यते॥ गजेन कश्चित्पुरुषः कानने समभिद्रुतः॥ जिघांसया भयत्रस्तः
प्रविवेश महद्वनं॥ अथ पश्यति तत्रस्थां सिंहरूपमवस्थितं॥ तं दृष्ट्वा संनिवर्तेत दिशाम
न्यामधावत॥ तत्रापश्यत् खड्गहस्तां भीमकर्मां च राक्षसीं॥ तस्या भयाच्च सोपश्यत् कन्यामति राम
भयानकां॥ आधावंतीमभिद्रुत्य स्वंति तिष्ठ तिष्ठेति चाब्रवीत्॥ तां दृष्ट्वा संनिवर्तित्वा दिशमन्या ४९

णांशस्य पञ्चाहि एकैकस्य पंचैकैको पि संभवति एवं च सति आकाशे शब्दोभिव्यज्यते वायौ शब्दस्पर्शौ
तेजसि शब्दस्पर्शरूपाणि जले शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगंधाः तेभ्यः पंची
कृतपृथिव्याः ब्रह्मांडमुत्पन्नं तदंतर्वर्त्ति लोकाश्चतुर्दश ब्रह्मांडं मनुष्यानरूपेण जाते ब्रह्मांडां
तर्वर्त्तिपृथिव्याः ओषधयरुत्पन्नाः ओषधिभ्योन्नं पितृभ्यां भुक्तान्नपरिणामरेतःशोणित
द्वारा स्थूलशरीरमुत्पन्नं तच्चतुर्विधं जरायुजमंडजस्वेदजमुद्भिज्जं चेति मनुष्यादिशरीरं जरा
युजं पक्षिपन्नगादिशरीरमंडजं यूकादिशरीरं स्वेदजं तृणगुल्मादिशरीरमुद्भिज्जं उक्तं स्थूल
शरीरं पुनः प्रकारांतरेण द्विविधः समष्टिव्यष्टिभेदात् पंचीकृतपंचमहाभूततत्कार्यब्रह्मांडां
तर्वर्त्तिकार्यं सर्वं समष्टिरित्युच्यते अथवा व्यक्तिषु गोत्वादिवत् सर्वव्यष्टिष्वनुस्यूतं पंचीकृत
भूतकार्यं ब्रह्मांडात्मकं व्यापकं समष्टिः वनवत् सकलस्थूलशरीरसमुदायो वा समष्टिरित्यु
च्यते एतदुपहितं चैतन्यं विराट् वैश्वानर इति चोच्यते विविधं राजमानत्वात् सर्वनराभिमा
नत्वाच्च प्रत्येकस्थूलशरीरं गवादिव्यक्तिवद्वा रतं व्यष्टिरित्युच्यते एतदुपहितचैतन्यं विश्व

॥ आपूर्वस्तीतथाप्रोक्तं मूषकः कालउच्यते ॥ योसौकूपतलेसर्पः सयमः कालउच्यते ॥ कामं मधुरसं
पो·सं· विद्धि संशयोनात्रविद्यते ॥ मधुनश्चापि यत्तोयं कामस्वादोहि सस्मृतः ॥ एवं श्रुतगुणोवत्स
५· धर्मो नष्टमतिर्भवः संशयेनाजितात्मा तं मोहं यासियथाक्रमं ॥ एवं संसारकूपस्य धर्मो
एवपरागतिः ॥ पंचरात्रेप्युक्तं ॥ संसारसागरंघोरमनंतं क्लेशभाजनं ॥ त्वामेवशरणं प्राप्यनि
स्तरंतिमुनीश्वराः ॥ अन्यत्रैव ॥ संसारसागरेघोरे विषयावर्त्तसंकुले ॥ अपारेदुस्तरेगाधेव
45 नैःहंकर्मभिःस्वकैः ॥ अनाथमगतिं भीरुं दययापरमाहरे ॥ मामुद्धरदयासिंधो संसाराब्धेसुदु
स्तरात ॥ विष्णुपुराणेप्युक्तं ॥ संसारपतितस्यैकोजंतोस्त्वंशरणंपरम ॥ तत्प्रसीदत्वमार्त्तिहरार्त्ति
हरममाशुभं ॥ अनित्यमसुखंलोकमिमंप्राप्यभजस्वमां ॥ इतिभगवतापुक्तं ॥ भारतेपितृपुत्रसंवा
दे ॥ पुत्रउवाच ॥ धीरः किंस्वित्तातकुर्यात्प्रजानन्यायुर्भृशंक्षीयतेमानवानां ॥ पितस्तदाचक्ष्व
ममस्वमाशुपरं चधर्मंत्वमहंचरेयं ॥ पितोवाच ॥ अधीहिवेदान्ब्रह्मचर्य्येणपुत्रपुत्रानिच्छेतार ५·
७ अनादिनिधनेदेवेजगतः प्रभवाप्यये भक्तामहेश्वरेचैवदुर्गागणपतिस्तरंतितेमांगलेमंगलेचैवसर्वपापप्रणाशने भक्ताश्रिविक्रमेदेवेदु
ढःखौघंतेनमोद्धारेधर्म्माधर्मजलेत्तथा क्रोधपंकेसुदुस्ग्राहेलोभबुद्बुदसंकुले मोहगंभीरपाताले सतपानाविमूढचित्ते मज्जं

मन्याभधावतः॥ यस्मान्मनुष्य एव ततः पूर्वं प्रदीप्तं वनमग्निना॥ सतत्र चिंतयामास अहोकष्टमुपस्थितं
॥ इतोगजइतः सिंह इतश्च व्याघ्र भीतोद्भवः॥ निराशोजीविते प्रामत्तत्र कूपमपश्यत॥ कव्हापृतन
मासंतमंधकारमनंतकं॥ सतत्र कूपपुरुषः पपातभयपीडितः॥ अथालोकयतेतत्र सर्पंकू
पतलेस्थितं॥ विजृंभमानं घोरास्यमश्वसंतं लेलिहाननं॥ वल्लीमाश्रयराजेंद्र तलेतिष्ठदधोमु
खः॥ अलांबुरिव तत्रासौ तस्यावल्यां प्रलंबितः॥ तस्यावल्यास्तु मूले च निकृंतति तत्र मूषकः॥
उपद्रवास्तु तत्रान्ये दंशकाः मक्षिकाः परः॥ तत्रान्युपद्रवो तस्य लोतोमधुकपावृतं॥ ततस्तस्या
स्थमानं तु तत्रप्यमाणमसत्कृतं॥ अपिबन्मधु तत्रस्थं पतितंतस्यमूर्द्धनि॥ पतितंमस्तकेतस्य म
धुतन्मुखमाविशत्॥ पतितंमस्तके सर्वमपिबत्सपिपासितः॥ एवंसपुरुषोवस्तघोरेवर्त्तते सं
कटे॥ तथा शरीरिणः सर्वे घोरे वर्त्तंति संकटे॥ संसारस्य प्रमाणस्वरूपमाह॥ योसौगजो महावीचि
विदूरे हि हिताहितं॥ सिंहात्तुरोगान्विजानीहि विहाराहारसंभवान्॥ अहिलग्नयाकव्याससंजरा
दुरतिक्रमा॥ योदावाग्निः सएषक्रोधो वै लोभमोहभयाश्रयः॥ कूपस्तु मानुषो लोकः कालोजगदुपद्रवः

तः पच्यते कालवह्निना ॥ बीजं पिता क्षेत्रमयी जनित्री वृद्धिस्तु कर्माणि शुभाशुभानि ॥ भूतानि शश्वत्प्रति
यो॰ सं॰ मानि लोके जातानि जातानि तु नाति कालं ॥ विष्णुपुराणे गृहस्थाकेपि ॥ जन्मन्यत्र महद्दुःखं म्रियमाणस्य
स्य चापि तत् ॥ यातनासु यमस्योग्रं गर्भसंक्रमणेषु च ॥ गर्भेषु सुखलेशोपि भवद्भिरनुभूयते ॥ यदि त
५१ त्कथ्यतामेव सर्वं दुःखमयं जगत् ॥ तदेतदतिदुःखानामास्पदे भवार्णवे ॥ भवतां कथ्यते सत्यं विष्णु
व रेकः परायणः ॥ बालोहं तावदिच्छातो यतिष्ये श्रेयसे युवा ॥ युवाहं वार्द्धके प्राप्ते करिष्याम्यात्मनो हितं ॥
46 वृद्धोहं मम कर्माणि समस्तानि न गोचरं ॥ किं करिष्यामि मंदात्मा समर्थेन न यत्कृतं ॥ एवं दुराशया क्षि
प्तमानसः पुरुषः सदा ॥ श्रेयसोभिमुखं याति न कदाचित्पिपासितः ॥ बाल्ये क्रीडनसक्ता वै यौवने विष
यान्मुखाः ॥ अज्ञानयन्त्यशक्त्या च वार्द्धकं समुपस्थितं ॥ तस्माद्बाल्ये विवेकात्मा यतेत श्रेयसे सदा ॥ बाल त
यौवनवृद्धाद्यैर्देहीभावैरसंयुतः ॥ तदेतद्वो मयाख्यातं यदि जानीत नानृतं ॥ तदस्मत्प्रीतये विष्णुः स राम
र्यतां बंधमुक्तिदः इति ॥ दुःखं जन्म जरा दुःखं दुःखं मृत्युः पुनः पुनः ॥ संसारमंडलं दुःखं पच्यंते यत्र जंत ५१

जन्ममृत्युजरादुःखैर्नित्यं संसारसागरे ॥ जंतवः परिक्लिश्यंते मत्सो नैव संपतिते तथा । यथा हि ते जीवितमात्मनः
प्रियं तथा परेषामपि जीवितं प्रियं । रक्षसे जीवितमात्मनो यथा तथा परेषामपि रक्ष जीवितं इति महाभारते

एणर्थं पितृणां मग्नीनाराय शिषिवद्धेऽष्टपत्रे वनं प्रविश्य मामनुनिर्गुमूर्त्तेन ॥ पुत्र उवाच ॥ मृत्युना भ्या
हते लोके जरयापरिपीडिते ॥ आधिभिश्च समाने च किं स्वस्थ इव भाषसे ॥ सर्वोपायैः सदा नास्ति काल
स्यास्य प्रतिक्रिया ॥ अहं कथं सती हि मे जालेनैवावृत स्थिर ॥ सर्वावासं सर्वसंज्ञानमाद्यं योगिध्येयं
वासुदेवं समग्रं ॥ नित्यानंदं चिंतयन्त्वं चिराय सर्वद्वंद्वैर्मोक्ष्यसे निर्विशमानः ॥ सर्वारंभान्परित्यज्य भ
विष्यामात्मयोगवित् ॥ आत्मज्ञानमधीयानो यजन्नात्मानमात्मना ॥ आत्मप्रज्ञो भविष्यामि न
मां कार्यते प्रजा ॥ सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतनं ॥ विविक्त चीरवसनं संतोषो येन के
न चिदितिः ॥ अन्यच्च तत्रैव ॥ बुद्धिमानपि दैवेन किं करोति नरः ॥ पंथानमपथ्या याति मत्याचा
म्रो नमानसः ॥ किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वकर्मभिः ॥ प्रायेण हि मनुष्याणां बुद्धिः कर्मानु
सारिणी ॥ न तथा चेष्टते तेषां भाविकर्मफलं यथा ॥ सन्निमज्जज्जगदिदं गंभीरे कालसागरे ॥ मृत्यु
रोगजराग्राहे न कश्चिदवबुध्यते ॥ अपाकोम्भ तभांडानां यान्तु शिल्पविनिर्मितः ॥ स्वकर्मैर्धनसंबी

नाजुष्टं सदैव पूतिकुत्सितं ॥ स्वल्लायां गीहितायां पद्दं तद्दं जंघात्वचं भुवं ॥ गुल्फास्थि पूरितं मांसं कथं
यो॰ सं॰ सुंदरतां व्रजेत् ॥ मांसमेदवसासारे किंसारं रहितं वद ॥ विष्टामूत्रमये कोणे कोदेहे रमते नरः इति ॥ हे
५२ पद्मपुराणेप्युक्तं ॥ सर्वोपायेन कर्तव्यो निग्रहः कामकोपयोः ॥ श्रेयो विनाशनस्यौ हि श्रेयोर्थोद्यमु रा
द्यतौ ॥ कामो हि बलवान् राजन् शरीरस्थो महारिपुः ॥ न तत्स्ववशगो भूयाज्जनः श्रेयोभिलाषकः
स्मरः संस्मरणाज्जातः इति तन्नाम कथ्यते ॥ यादृशस्तादृशो रंगो वृत्तमेव समाश्रयेत् ॥ आत्मतेज
प्रकाशात्स आधाराधेयतां व्रजेत् ॥ नार्यां रूपसमाश्रिस्म धीरं तमपि मोहयेत् ॥ पुरुषं च समाश्रि
47 त्य स्वरूपवयसंपयोषितां ॥ स एवं सहसा राजन् शरीरी शरीरगः ॥ वर्त्तते रिपुरत्यंतं मा तत्स्ववशगो भ
वः ॥ सर्वाः शुचिविधानस्य कृतघ्नस्य विनाशिनः ॥ शरीरकस्यापि कृते कथं पापं विधीयते ॥ यं प्राप्य
ति पवित्राणि पंचगव्यहवींषि च ॥ अशुचित्वं क्षणाद्यांति कोन्यः स्यादशुचिस्ततः ॥ जिघ्रन्नपि सु राम
दुर्गंधिं पश्यन्नपि मलं स्वकम् ॥ न विरज्यति लोकोयं पीडयन्नपि नासिकां ॥ हद्यान्यप्यन्नपानो ५२

वरितीतिहासे॥ निःसंगतामुक्तिपदंयतीनांसंगादशेषाःप्रभवंतिदोषाः॥ आरूढयोगोपिनिपात्यतेधःसं
गेनयोगी किमुताल्पसिद्धिः इतिविष्णुपुराणे॥ तथाश्रीभागवतेपि॥ संगंत्यजेतमिथुनव्रतीनांमुमुक्षुःस
र्वात्मनानविसृजेद्बहिरिंद्रियाणि॥ एकश्चरेद्रहसिचित्तमनंतईशेयुंजीततद्व्रतिषुसाधुषुचेत्प्रसंगरि
ति॥ स्त्रीणांतत्संगिनांसंगंत्यक्त्वादूरतआत्मवान॥ क्षेमेविविक्तआसीनश्चिंतयेन्मामतंद्रितरितिच॥
महत्सेवांद्वारमाहुर्विमुक्तेस्तमोद्वारंयोषितांसंगिसंग॥ महांतस्तेसमचित्ताःप्रशांताविमन्यवःसुहृ
दःसाधवोयेइतिच॥ तत्संगेपातित्यमाह॥ योषिद्धिरण्याभरणांबरादिद्रव्येषुमायारचितेषुमूढः
॥प्रलोभितात्मात्युपभोगबुद्ध्यापतंगवन्नश्यतिनष्टदृष्टिः॥ इति॥ नारदीयपुराणेस्त्रीस्वरूपमुक्तं॥ प
ग द्वंद्वंवर्तुलंवक्त्रंसीमंतंदृश्यतेशुभं॥ अस्थिपंजरमेतद्धिचर्ममांसावृतंतिति॥ वसामेदश्चनयनेसे
ज्वलेस्त्रीषुसंस्थिते॥ अमुक्तिस्तनभिस्मांसंस्तनाख्यायस्वदस्थितं॥ निर्मांसितादृश्यतित्रिवलीजठरा
श्रिता॥ पुनरेवाधिकंमांसंमैस्थितंजघनवर्त्मनि॥ मूत्रद्वारमिदंगुह्यंपत्रमुग्धंजगत्त्रयम॥ अपांवायु

न

तं चिंतं कोऽस्य न्योमोचितुं क्षमः ॥ आत्मारामेश्वरं मत्तं भगवंतं रमाधवं ॥ तंडुलस्य यथा चर्म यथा ताम्रस्य का ८
पो॰सं॰ लिका ॥ नश्यति क्रियया वीर पुरुषस्य तथा मलः ॥ जीवस्य तंडुलस्यैव सहजोपि मलो महान् ॥ नश्यत्येव न
५२ संदेहो तस्मात् कर्मादि तं कुरु इति ॥ अन्यदपि ॥ के के न चवशं नीता कामिनो मदनेन वै ॥ दुर्जयेण त्रिलोकां
तु विना नारायणाश्रितान् ॥ दुर्जयं त्रिषु लोकेषु शेषं पंजे कंथ तु लभ्यते ॥ फलाहके कृपरीणामे जानंतोपि पतं
ति हि ॥ जालमध्ये शकुंतोश्च दृष्ट्वा न्यायं न पिबंति ताम् ॥ स्वयमेवापि वध्यंते कर्मणा स्वेन यंत्रिता ॥ अ
हो आशा वलं तीनं एणं विषयजा सतां ॥ येतु दृष्ट्वापि वध्यंते पूर्वेषां तु धनं स्वतः इति ॥ भगवतापु मं
व कामेषु कोधैर्यरजोगुणसमुद्भवः ॥ महाशनो महापाप्मा विद्धेनमिह वैरिणं ॥ अन्यच्च ॥ कामक्रोधस्त
48 था लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नर इति ॥ लोभस्वरूपं महाभारते
पुष्टिरवाच ॥ पापस्य किमधिष्ठानं का प्रवृत्तिश्च भारत ॥ किं चास्य कारणं प्रोक्तं तन्मे ब्रूहि पितामह ॥ भीष्म उवाच ॥ राम
च ॥ लोभप्रवृत्तिः पापस्य प्रवृत्तिर्लोभ एव च ॥ अत्र ते संशयो माभूत् लोभः पापस्य कारणम् ॥ लोभात्क्रोधः प्रभ
वति लोभाद्द्रोहः प्रवर्तते ॥ लोभान्मोहश्च माया च मानो मत्सर एव च ॥ नार्थैः पूरयितुं एको लोको वकुवि ५२

ग

त्रियं प्राप्य सुरभीणि च ॥ अशुचित्वं प्रयांत्याशु कोन्यः स्यादशुचित्ततः ॥ यस्योदरगतस्यान्नं रूपं स हि परि
त्यजेत् ॥ कृमिविष्ठाभस्मधर्मान्तशीघ्रं संजायते किल ॥ तथा देहापि भूपाल निजरूपे हि परिमज्जेत ॥ मृतं शरी ८
रमुत्सृज्य काष्ठलोष्ठसमं भुवि ॥ विमुखा बांधवा यांति धर्मस्तमनुगच्छति ॥ गम्यमानेषु सर्वेषु हीय
मानेतपायुषी ॥ जीविते लुप्यमाने त्वं किं मुधायन्न धावसि ॥ कुटुंबं पुत्रदाराश्च शरीरं द्रव्यसंचयः ॥
नु पारक्यमध्रुवं किं स्वीयं सुकृतदुष्कृतं ॥ यदा सर्वं परित्यज्य गंतव्यमवशेन ते ॥ अनर्थे किं प्रसक्तस्त्वं
स्वधर्मं नानुतिष्ठसि ॥ अविश्राममनालंबमपाथेयमदेशिकं ॥ तमःसंतानमध्वानं कथमेको
गमिष्यसि ॥ न हि त्वां प्रस्थितं कश्चित्पृष्ठतोनुगमिष्यति ॥ सुकृतदुष्कृतं च त्वां यास्यंतमनुया
स्यति ॥ श्रुतिस्मृत्युदितं किंचित्कुलदेशोचितं हितं ॥ धर्ममूलं निषेवस्व सदाचारमतंद्रितः ॥ परित्य
वि जेदर्थकामौ स्यातां धर्मवर्जितौ ॥ धर्मेण प्राप्यते सर्वमर्थकामादिकं सुखं ॥ इंद्रियाणां जये योगं स
मातिष्ठ दृढ हर निशम् ॥ किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा ॥ किं विविक्तेन वासेन ह्येभिर्यस्याहृतं
धने मनः ॥ एक एव सुहृद्धर्मो निष्यनुयाति यः ॥ सर्वमन्यत्तु शरीरेण समं नाशं गमिष्यति ॥ पुंश्चल्यापहृ
१ न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते १

पो॰सं॰
५४
न
49

रथानां न समाप्तिरस्ति वर्षायुतेनाप्यथवापि लक्षैः॥ पूर्णेषु पूर्णेषु पुनर्नवानामुत्पत्तयः संति मनोरथानां
पद्भ्यां गता यौवनिनश्च जाता दारैश्च संयोगमिताः प्रसूताः॥ दृष्टाः सुतास्तत्तनयः प्रसूतिं द्रष्टुं पुन
र्वाञ्छति मेन्तरात्मा॥ दृष्टा मितेषामपि चेत्प्रसूतिं मनोरथो मे भविता ततोन्यः॥ पूर्णेपि तत्राप्यप
रस्य जन्म निवार्यते केन मनोरथस्य॥ आमृत्युतो नैव मनोरथानामंतोस्ति विज्ञातमिदं मयाद्य॥
मनोरथासक्तपरस्य चित्तं न जायते वै परमार्थसंगि॥ स मे समाधिर्जलवासिमित्रमत्स्यस्य सं
गात्सहसैव नष्टः॥ परिग्रहः संगकृतो ममायं परिग्रहोत्थाश्च महाविधित्साः॥ सुखप्रदे वैकश
रीरजन्म शतानि संख्यं तदिदं प्रसूतं॥ परिग्रहेण क्षितिपात्मजानां सुतैरनेकैर्बहुलीकृतं त
त्॥ सुतात्मजैस्तत्तनयैश्च भूयो भूयश्च तेषां च परिग्रहेण॥ विस्तारमेष्यत्यतिदुःखहेतुः परिग्रहो
वै ममतानिधानं॥ चीर्णं पयो मत्तु जलाश्रयेण तस्यर्द्धिरेषा तपसोन्तरायः॥ मत्स्यस्य संगादभवच्च यो
मे सुताभिरागो मुषितोस्मि तेन॥ सर्वस्य धातारमचिंत्यरूपमणोरणीयांसमतिप्रमाणं॥ सिता

राम
५४

म
२ भक्त्यानुममताहा निर्जायते नात्र संशयः पुरानुजनकोमाराजर्षिर्लोकविश्रुतः ॥ हैर्भक्षितैवममतां न पश्यामा ॰ खिल संपादि इति वायुपुराणे
धेरपि ॥ निःसंगंभीरतायांः तिरपश्यामि रिवार्णवः ॥ अष्टादश सहस्राणि द्वीपान्भुंजन्नुहूरवा ॥ नुजोषनैव
रत्नानां लोभादिति हिनःश्रुतम् ॥ सर्वभूतेषु तिष्ठतःसर्वभूतेषु हिंसकः ॥ सर्वभूतेषु जिह्मश्च लुब्धो
भवति भारत ॥ उत्पद्यते परां भक्तिं विष्णुपादांबुजाश्रया ॥ तदा लोभःक्षयं यांति स्मनुपुंसां सुदुर्लभा ॥
सुमहात्मपि शास्त्राणि धारयंतो बहुश्रुताः ॥ छेत्तारः संशयानां च लोभग्रस्ता व्रजंत्यधः ॥ लोभक्षयेत्वयं
यांति सर्वपापानि देहिनां ॥ लोभक्षयो विवर्द्धते नत्रुपते नात्र संशयः ॥ यदा लोभःक्षयं यांति यांति नाशमु
पद्रवाः ॥ तदा नु जायते पुंसो धर्मे बुद्धिः सुदुर्लभा ॥ धर्मार्थकाममोक्षाणां चतुर्णामिह साधनं ॥ धर्म
मेव परं प्राहुर्मुनयस्तत्वदर्शिनः ॥ न प्राप्तिर्धर्मसंबंधो लोभाक्रांतस्य देहिनः ॥ स एव धर्मविघ्नं
सी लोभः परमदारुणः ॥ तस्मात्सर्वप्रयत्नेन त्यज लोभं युधिष्टिर ॥ यदीच्छसि महाराज शाश्वतीं गतिं
मात्मनः ॥ विनष्टलोभा विबुधा मुनिः स्पृहाप्रशांतचित्ताः परिहीनमत्सराः ॥ व्रजंति विष्णोः परमेव तत्पदं स
नातनं यत्प्रवदंति योगिनः ॥ इतिहासमिमं पुण्यं लोभाख्यानं सुदुर्लभम् ॥ यः पठेच्छृणुयान्नित्यं स ग
च्छेत्परमां गतिम् ॥ इतिहाससमुच्चये लोभाख्यानं नाम द्वादशोध्यायः ॥ विष्णुपुराणेपि लोभख्याकं ॥ मनो

इति

रोधरिति ॥ भगवानपितत्र ॥ असंशयंमहाबाहोमनोदुर्निग्रहंचलम ॥ अभ्यासेनतुकौंतेयवैराग्येण
यो.सं. चगृह्यते इति ॥ अन्यान्यपिचित्तजयेउपायदर्शितानि ॥ अध्यात्मविद्याधिगमसाधुसंगमएवच ॥ वा
५५ सनासंपरित्यागःप्राणस्पंदनिरोधनं ॥ एतास्तायुक्तयःपुष्टाःसंतिचित्तजयेकिलेति ॥ विष्णुपुराणे
प्युक्तं [illegible] सप्तर्षीणांवाक्यं ॥ राजपुत्रयथाविष्णोराराधनपरैर्नृभिः ॥ कार्य्यमाराधनंतन्नोयथाव
च्छ्रोतुमर्हसि ॥ बाह्यार्थानखिलांस्त्यक्त्वाजपेत्प्रथमंनरः ॥ तस्मिन्नेवजगद्धाम्नितन्तःकुर्वीतनिश्च
लमिति ॥ तत्रयोगांगमष्टधाप्युक्तं ॥ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो
50 ष्टावंगानि ॥ यथाक्रममेतेषामनुष्ठानंस्वरूपंचवक्ष्यामः ॥ तत्राहिंसासत्यमस्तेयब्रह्मचर्य्यापरिग्र
हाःयमाः ॥ [illegible] अष्टांगमैथुनवर्ज्यंब्रह्मचर्य्यंयथाकृतः ॥ स्मरणंकी
र्तनंकेलिःप्रेक्षणंगुह्यभाषणं ॥ संकल्पोध्यवसायश्चक्रियानिवृत्तिरेवच ॥ एतन्मैथुनमष्टांगं एम
प्रवदंतिमनीषिणः ॥ विपरीतंब्रह्मचर्य्यमनुष्ठेयंमुमुक्षुभिः ॥ सत्संगस्तन्निधिस्त्यागदोषदर्शन ५५
तोभवेदिति ॥ अतएवस्त्रीसंभाषणादिनिषेधोप्युक्तं ॥ नसंभाषेत्स्त्रियंकांचित्पूर्वदृष्टां

सितं चेश्वराणामाराधयित्वेन न चैव विष्णुं ॥ तस्मिन्नशेषोजसि सर्वरूपिण्यात्मकं विसृष्टस्ततावनंते । ह
ममावलंबितमपेतदुःखं सदा तु विष्णावभयाय भूयः ॥ समस्तभूतादमलादनंतात्सर्वेश्वरादन्यद
नादिमध्यात् ॥ यस्मान्न किंचित्तमहं गुरूणां परं गुरुं संश्रये मेमि विष्णुमिति ॥ आनंदमूलगुणपल्लवत
त्वशाखवावृतानि पुष्पफलमोक्षरसाहिपूर्णाः ॥ चेतो विहंगम हरिं तुंगतरुं विहाय संसारशुष्कविटपे वद किं रतोसि
॥ पद्मपुराणे अंबरीषं प्रति नारदवाक्यम् ॥ योगज्ञानमपि ते भूप एष एव भक्तिं वदाम्यहम् ॥ प्राणायामपरो नित्यं
ध्यानवांश्च जितेंद्रियः ॥ भैक्ष्यभक्षी ब्रह्मचारी चापि सर्वद्वंद्वसमाहृतेंद्रियः ॥ धारणाहृत्पंकजस्था ध्यायमानो महेश्व
रं ॥ हृत्पद्मकर्णिकासीनं पीतवस्त्रं सुलोचनम् ॥ पुरुषं तु द्योतितमुखं अग्निसूर्येंदुकदीप्तिदम् ॥ श्वेतवर्णं चतु
र्बाहुं वराभयहस्तकम् ॥ योगज्ञानमसीसिद्धिः विष्णुभक्तिपरास्मृताः ॥ यएवं भक्तिमान्देवे विष्णु
भक्तः स उच्यते ॥ एवं भक्तिः समुद्दिष्टा त्रिविधा नृपनंदन ॥ सात्विकी राजसी चैव तामसी भेदतस्त्विमाः ॥
नानाप्रकारं देशेया विज्ञेया विस्तारमितततेजसः ॥ अथ योगांगानि लिख्यंते ॥ तत्र योगस्वरूपं दर्शितं पतं
जलिना ॥ योगश्चित्तवृत्तिनिरोधः ॥ इति चित्तवृत्तिनिरोधे उपायोपि दर्शितस्तत्रैव ॥ अभ्यासवैराग्याभ्यां तन्नि

यो॰सं॰ ५६ — सनंप्रोच्यते ॥ गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् पार्श्वे पादौ च पाणिभ्यां दृढं बद्धा सुनि
श्चलं भद्रासनं भवेदेतत्सर्वव्याधिविनाशनं । नेतो दृढा नभिधानः ॥ शीतोष्णादिभिर्द्वंद्वैरासनैर्या ना — ज
भिभूयत इति । आसनानि ॥ अथासने वशी योगी दृढचित्तं मिताशनः ॥ गुरूपदेशमार्गेण प्राणा
यामं समभ्यसेत् ॥ चले वाते चलं चित्तं निश्चले निश्चलं तथा ॥ योगी स्थाणुत्वमाप्नोति ततो
वायुं निरोधयेत् ॥ यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते ॥ मरणं तस्य निष्क्रांतिस्ततो वायुं
52 — निरोधयेत् ॥ मलाकुलासु नाडीषु मारुतो नैव मध्यगः ॥ कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भ
वेत् ॥ शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम् ॥ तदा संजायते प्राणसंरोधने क्षमः ॥ प्राणा — योगी
यामं ततः कुर्यान्नित्यं सात्त्विकया धिया ॥ यथा सुषुम्णानाडीस्था मलाः शोषं प्रयान्ति च ॥ बद्ध
पद्मासनो योगी प्राणं चंद्रेण पूरयेत् ॥ धारयित्वा यथाशक्तिः पुनः सूर्येण रेचयेत् ॥ येन त्यजेत्ते — पम ५६
न सूर्यधारदनिरोधतः ॥ पूरयेच्च ततोन्येन शनैः पव नमेकतः ॥ प्राणं चेदिडया पिबेन्नियमि
२ प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः ॥ विधिवत्कुंभकं कृत्वा पुनश्चंद्रेण रेचयेत् २

चनं स्मरेत्॥ कथां च वर्जयेत् तावत् न पश्येल्लिखितमपि नारीं स्म्रृतौ॥ शौचसंतोषतपःस्वाध्यायेश्व
रप्रणिधानानि नियमाः॥ आसनानि पद्मस्वस्तिकादीनि तेषां च स्वरूपं दर्शितं॥ सव्यं पादमुपादाय द
क्षिणोपरि विन्यसेत्॥ तथैव दक्षिणं पादं सव्यस्योपरि विन्यसेत्॥ विष्टभ्य कटिं ग्रीवां नासाग्रन्यस्त
लोचनः॥ पद्मासनं भवेदेतत्सर्वेषामपि पूजितं॥ अन्यमतम्॥ वामोरूपरि दक्षिणं हि चरणं संस्था
प्य वामं तथा दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढं॥ अंगुष्ठौ हृदये निधाय चिबुकं नासा
ग्रमालोकयेदेतद्व्याधिविकारनाशनपरं पद्मासनं प्रोच्यते॥ अन्यमतम्॥ उत्तानौ चरणौ कृत्वा
ऊरुसंस्थौ प्रयत्नतः॥ ऊरुमध्ये तथोत्तानौ पाणी कृत्वा तु तादृशौ॥ नासाग्रे विन्यसेद्दृष्टिं दंतमूले च
जिह्वया उत्तंभ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः॥ इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनं दुर्ल
भं येन केनापि धीमता लभ्यते भुवि॥ जानूर्वोरंतरे सम्यक्कृत्वा पादतले उभे॥ ऋजुः कायः समासीनः
स्वस्तिकं तत्प्रचक्षते॥ योनिस्थानकमंघ्रिमूलघटितं कृत्वा दृढं विन्यसेत् मेढ्रे पादमथैकमेव नियतं
कृत्वा समं विग्रहं स्थाणुः संयमितेंद्रियोऽचलदृशा पश्यन् भ्रुवोरंतरं एतन्मोक्षकपाटभेदजनकं सिद्ध

घो॰स॰ ५२

52

पदा नाडी विशुद्धिः स्यात्तदा चिह्नं निराकुलम्॥ कायस्य कृशता कांतिस्तदा जायते निश्चितं॥ यथेष्टं धा
रणं वायोरनलस्य प्रदीपनं॥ अलक्षिव्यक्तिरारोग्यं जायते नाडिशोधनात्॥ ब्रह्मादयोऽपि त्रिदशाः
पवनाभ्यासतत्पराः॥ तेन सिद्धिंगताः केच तस्मात्पवनमभ्यसेत्॥ यावद्बद्धो मरुद्देहे तावच्चित्तं नि
रामयं॥ यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः॥ विधिवत्प्राणसंयामैर्नाडीचक्रे विशोधिते॥ सु
षुम्णावदनं भित्वा सुखे विशति मारुतः॥ मारुते मध्यसंचारे मनःस्थैर्यं प्रजायते॥ यो मनसः
स्थिरीभावः सैवावस्था मनोन्मनी॥ तत्सिद्धये विधानज्ञो चित्रं कुर्वंति कुंभकान्॥ सूर्यभे
दनमुज्जायी शीतकारी शीतली॥ भस्त्रिका भ्रामरी मूर्छा संहिता अष्ट कुंभकाः॥ पूरकांते तु
कर्तव्यो बंधो जालंधराभिधः॥ कुंभकांते रेचकादौ कर्तव्यस्तूड्डियानकः॥ अपानमूर्ध्वमाकृष्य प्रा राम
णं कंठादधो नयेत्॥ योगी जराविमुक्तः सन् षोडशाब्दवयसो भवेत्॥ आसने सुखदे योगी बद्ध्वा वज्रा ५२
सनं ततः॥ दक्षनाड्या समाकृष्य बहिस्थं पवनं शनैः॥ आकेशाग्रं नखाग्रं च शिरोध्यवधि कुंभ

तं भूयोन्यया रेचयेत्॥ पीत्वा पिंगलया समीरणमथो बद्ध्वा त्यजेद्वामया॥ सूर्याचंद्रमसोरनेन विधिना
भ्यासं सदा तन्वतां शुद्धा नाडिगणा भवंति यमिनां मासत्रयादूर्द्ध्वतः॥ प्रातर्मध्यंदिने सायमर्द्धरात्रौ च
कुंभकान्॥ शनैरशीतिपर्यंतं चतुर्वारं समभ्यसेत्॥ इडया पिब षोडशभिः पवनं चतुःषष्टिक
मोदरिकं॥ त्यज पिंगलया शनकैः शनकैः दशभिर्दशभिर्द्वाभिर्धिकैः॥ कनीयसि भवेत् स्वेदः
कम्पो भवति मध्यमे॥ उत्तिष्ठत्युत्तमे प्राणरोधे पद्मासने स्थिते॥ जलेन श्रमजातेन गात्रमर्दनमा
चरेत्॥ दृढता लघुता चापि तेन गात्रस्य जायते॥ अभ्यासकाले प्रथमं शस्तं क्षीराज्यभोजनम्
ततोभ्यासे दृढीभूते न तादृक् नियमग्रहः॥ यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः॥ तथैव सेवि
तो वायुरन्यथा हंति साधकं॥ प्राणायामेन युक्तेन सर्वरोगपरिक्षयः॥ अयुक्ताभ्यासयोगेन सर्व
रोगसमुद्भवः॥ हिक्का कासस्तथा श्वासः शिरःकर्णाक्षिवेदनाः॥ भवंति विविधा दोषाः पवनस्य व्यति
क्रमात्॥ युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च पूरयेत्॥ युक्तं युक्तं च बध्नीयादेवं सिद्ध्यति योगवित्

तिन् ॥ अथ भस्त्रिका ॥ ऊर्वोपरि संस्थाप्य शुभे पादतले तथा ॥ पद्मासनं भवेत्सम्यक् सर्वपापप्रणा
यो॰सं॰ शनं ॥ सम्यक् पद्मासनं बद्धा समग्रीवोधरा सुधी ॥ मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत् ॥ यथा
५८ लगति हृत्कंठे कपालावधिपूरयेत् ॥ वेगेन पूरयेत्सम्यक् हृत्पद्मावधिमारुतं ॥ पुनर्विरेचयेत्तद्वत्
पूरयित्वा पुनस्ततः ॥ यथैव लोहकारेण भस्त्रा वेगेन चाल्यते ॥ तथैव स्वशरीरस्थं चालयेत्पवनं
धिया ॥ यथा श्रमो भवेद्देहे तथा सूर्येण पूरयेत् ॥ यथोदरं भवेत्पूर्णं पवनेन तथा लघु ॥ धारयेन्ना
53 सिका मध्या तर्जनीभ्यां विना दृढं ॥ कुंभकं पूर्ववत्कृत्वा रेचयेदिडयानिलं ॥ वातपित्तश्लेष्महरं शरी
राग्निविवर्द्धनं ॥ कुंडलीबोधनं क्षिप्रं पापघ्नं सुखदं शुभं ॥ ब्रह्मनाडीमुखे संस्थं कफाद्यर्गलनाश
नं ॥ सम्यग्गात्रसमुद्भूतं ग्रंथित्रयविभेदकं ॥ विशेषेणैव कर्तव्यं भस्त्राख्यं कुंभकं त्विदं ॥ अथ भ्रामरी भ
वेगाद्घोषं पूरकं भृंगनादं भृंगीनादं रेचकं मंदमंदं ॥ योगींद्राणामेवमभ्यासयोगाच्चित्ते जाता काचिदा सम
नंदलीला ॥ अथ मूर्छा ॥ पूरकांते गाढतरं बद्ध्वा जालंधरं शनैः ॥ रेचयेन्मूर्छनाख्येयं मनोमूर्छा सु ५८

कं॥ ततः शनैः सव्यनाड्या रेचयेत्पवनं पुनः॥ कपालशोधनं वातदोषघ्नं कृमिदोषहृत्॥
पुनः पुनरिदं कार्य्यं सूर्यभेदनमुत्तमं॥ उज्जायी॥ मुखं संयम्य नाडीभ्यामाकृष्य पवनं शनैः
यथा लगति कंठात्तु हृदयावधि सस्वनं॥ पूर्ववत्कुंभयेत्प्राणं रेचयेदिडया ततः॥ श्लेष्मदो
षहरं कंठे देहानलविवर्द्धनं॥ नाडीजलोदरं धातुगतदोषविनाशनं॥ गछता तिष्टता का
र्य्यमुज्जाय्याख्यं च कुंभकं॥ सीत्कारः॥ सीत्कां कुर्यात्तथा वक्त्रे घ्राणेनैव विसर्जयेत्॥ एवम
भ्यासयोगेन कामदेवो द्वितीयकः॥ योगिनीचक्रसंमान्यः सृष्टिसंहारकारकः॥ न क्षुधा न तृषा नि
द्रा नैवालस्यं प्रजायते॥ भवेत्सत्वं च देहस्य सर्वोपद्रववर्जितः॥ अनेन विधिना सत्यं योगींद्रो भू
मिमंडले॥ रसनाग्रात्तु सूर्येणापः प्राणं सततं पिवेत्॥ श्रमदाहौ न भवेत्तस्य सर्वरोगपरिक्षयः
अथ शीतली॥ जिह्वया वायुमाकृष्य पूर्ववत्कुंभसाधनं॥ शनैस्तु घ्राणरंध्राभ्यां रेचयेदनि
लं सुधी॥ गुल्मप्लीहोदरं चापि ज्वरं चापित्तधातृषां॥ विषिवच्छीतली नाम कुंभकोयं निहं

जालंधरकृते बंधे कंठसंकोचलक्षणे॥ न पीयूषं पतत्यग्नौ न च वायुः प्रकुप्यति॥ कंठसंकोचने
यो॰ टी॰ नैव द्वे नाड्यौ स्तंभिते ध्रुवं। मध्यचक्रमिदं ज्ञेयं षोडशाधारबंधनं। अधस्तात्कुंचनेनाशु कंठसंको
५६ चने कृते॥ मध्ये पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः॥ इडा च पिंगलां बद्ध्वा वाहयेत्पश्चिमं पथं॥ अ
नेनैव विधानेन सेवयेत्सततं नरः॥ ततो न जायते मृत्युर्जरारोगादिकं तथा॥ अथ उड्डीयानबंधः
बंधो येन सुषुम्नायां प्राणस्तूड्डीयते यतः॥ तस्मादुड्डीयनाख्योयं योगिभिः समुदाहृतं॥ उड्डीनं कुरु
ते यस्मादविश्रांतं महाखगः॥ उड्डीयानं तदेव स्यान्मृत्युबंधो निगद्यते॥ उदरे पश्चिमं तानं नाभे
57 रूर्ध्वं तु कारयेत्॥ उड्डीयानो ह्यसौ बंधो मृत्युमातंगकेसरी॥ उड्डीयानं तु सहजं गुरुणा कथितं यथा॥ अ
भ्यसेत्सततं यस्तु वृद्धोपि तरुणायते॥ नाभेरूर्ध्वमधश्चापि तानं कुर्यात्प्रयत्नतः॥ षण्मासमभ्यसे राम
न्मृत्युं जयत्येव न संशयः॥ संनिबद्धासने पादौ कराभ्यां धारयेद्दृढं॥ गुल्फदेशसमीपे च कंदं तत्र ५६
श्री प्रपीडयेत्॥ पश्चिमतानमुदरे कारयेच्चिबुकं हृदि॥ शनैः शनैर्यथा प्राणस्तदा संधिं प्रगच्छति

मत॥ अथ संहितं॥ प्राणायामास्त्रिधा प्रोक्ता रेचपूरककुंभकैः॥ संहितः केवलश्चेति कुंभको द्विविधो मतः
श्रारे चपूरयेत्कुर्यात्स वै संहितकुंभकः॥ यावत्केवलसिद्धिः स्यात्तावत्संहितमभ्यसेत्॥ रेचकं पूरकंमु ५
क्त्वा सुखं यद्वायुधारणं॥ प्राणायामोयमित्युक्तः स वै केवलकुंभकः॥ केवले कुंभके सिद्धे रेचकपूरकवर्जि
ते॥ न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यते॥ शक्तः केवलकुंभेन यथेष्टं वायुधारणं॥ राजयोगपदं
चैव लभते नात्र संशयः॥ हठं विना राजयोगो राजयोगं विना हठः॥ न सिध्यति ततो युग्ममानिष्पत्तेः
समभ्यसेत्॥ कुंभकं प्राणरोधांते कुर्याच्चित्तं निराश्रयं॥ एवमभ्यासयोगेन योगपदं व्रजेत्॥ कुं राज
भकात्कुंडलीबोधः कुंडलीबोधतो भवेत्॥ अनर्गला सुषुम्णा तो हठसिद्धिश्च जायते॥ वपुः कृशत्वं व
दने प्रसन्नता नादस्फुटत्वं नयने सुनिर्मले॥ आरोग्यता बिंदुजयोग्निदीपनं नाडीविशुद्धिर्हठसि
द्धिलक्षणं॥ अथ जालंधरबंध॥ कंठमाकुंच्य हृदये स्थापयेद्दृढमिच्छया॥ बंधो जालंधराख्योयमम
नाहयकारकः॥ बध्नाति हि शिरोजालमधोगामि नभोजलं॥ ततो जालंधरो बंधः कंठदुःखौघनाशनः

यो॰सं॰ ६

ष्टाश्वयुक्तमिव वाहनेन विद्वान्मनो धारयेताप्रमत्त इति ॥ पातंजलेप्युक्तं ततः क्षीयते प्रकाशावरणं
॥ प्राणायामानभ्यस्यतो ऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म यत्तदाचक्षते ॥ महामोहमये
नेंद्रजालेन प्रकाशशीलं सत्वमावृत्य तदेवाकार्ये नियुंक्त इति ॥ तदस्य प्रकाशावरणं कर्म संसारनि
बंधनं प्राणायामाभ्यासाद्दुर्बलं भवति प्रतिक्षणं च क्षीयते । तथा चोक्तं श्रुतौ ॥ तपो न परं प्राणायामादि
ति ॥ ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति ॥ एवं प्राणायामादिना प्राणस्पंदे निरुद्धे ऽखिलान्यपि [illegible]
पा निरुध्यंते ॥ प्राणस्पंदाधीनत्वाच्चित्तवृत्तेरुदयस्य ॥ ततश्च स्वभावतः शांतस्य आकाशमंतःकरण
मनात्माकारवृत्तिनिरोधादात्मैकाकारं भवति ॥ इति प्राणायामः ॥ अथ कः प्रत्याहार इति ॥ स्वविषया
संप्रयोगे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहारः ॥ स्वविषयैरसंप्रयोगे चित्तस्वरूपानुकार इवेति
चित्तानुरोधे चित्तनिरुद्धानींद्रियाणि नोपायांतरमपेक्षंते ॥ यथा मधुकरराजं मक्षिका उत्पतंतमनूत्प
तंति निविशमानमनुनिविशंते ॥ तथेंद्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहारः ॥ [illegible]

परं

एम ६

55

सर्वेषामेव बंधानामुत्तमोस्तु दुपानकः॥ उड्डीयानेकृते बंधे मूलं स्वाम्यविकं भवेदिति॥ आकेशा
दानखाग्राच्च तपस्तप्तं तदुत्तमम्॥ आकाशाज्जायते वायुर्वायोरग्निः प्रजायते॥ अग्नेरापस्च जायंते ततो
तः शोध्यते त्रिभिः॥ प्रणवाद्यास्त्रयो वेदाः प्रणवे पर्यवस्थिताः॥ वाङ्मयं प्रणवं सर्वं तस्मात्प्रणवमभ्य
सेत्॥ प्रणवे नित्ययुक्तस्य सव्याहृतिषु सप्तसु त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित्॥ एकाक्षरं प
रं ब्रह्म प्राणायामः परं तप इति॥ प्राणायामस्त्रयो ज्ञेयास्तु यथाकालमुदीरितः॥ अहोरात्रकृतात्पापात्त्रयाणा
देवनश्यति॥ सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह॥ त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते॥
कर्मणा मनसा वाचा यद्रात्रौ क्रियते त्वघं॥ तत्सर्वं विलयं याति प्राणायामैर्न संशयः॥ प्राणायामैः
य आत्मानं नियम्यास्ते पुनः पुनः॥ दशद्वादशभिर्वापि चतुर्विंशात्परं तपः॥ सव्याहृतिकाः सप्रणवाः प्रा
णायामास्तु षोडशः॥ अपि भ्रूणहनं मासात्पुनंत्यहरहः कृताः॥ इति विवचनं॥ प्राणायामसमनो
नाशोपायस्त्विष्टतावदुक्तम्॥ प्राणापीडयेह सुप्युक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसिता॥ दु

सोत्तरःपरमस्वराट्॥ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं॥ऊर्द्धरेतंविरूपाक्षंविश्वरूपायवैनमः॥नसंदृशे
तिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चनैनं॥हृदामनीषामनसाभिक्लृप्तोयएनंविदुरमृतास्तेभवंति
पो॰सं॰ [illegible]प्रमाणं॥स्मृतयश्च॥ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठतिभ्रामयन्सर्वभूतानियंत्रा
६१ रूढानिमायया॰ सर्वस्यचाहंहृदिसंनिविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंचेति॥आदित्यांतर्गतंयच्चज्यो
तिषांज्योतिरुत्तमं॥हृदयेसर्वभूतानांजीवभूतःसतिष्ठतीतिच॥रविमध्येस्थितःसोमःसोममध्येहुताश
56 नः तेजमध्येस्थितःसत्त्वंसत्त्वमध्येस्थितोऽच्युतः॥उपविश्यासनेरम्येकंबलाजिनकुशोत्तरे॥सम्यक्प
द्मासनासीनोभूतशुद्धिंसमाचरेत्॥प्राणायाममंत्रपूर्वंतुवामंत्रेणचालितेंद्रियः॥उदङ्मुखंततःकृत्वा
हृत्पंकजमनुत्तमं॥विकाशंतस्यकुर्वीतविज्ञानरविणाहृदि॥तत्केशिकायांचसूर्यशशिविंबान्यनु एम
क्रमात्॥त्रयंत्रयीमयंतस्मिंश्चिंतयेद्देहवान्नरः॥नानारत्नमयंपीठंतेषामुपरिचिंतयेत्॥तस्मिन् ६१
उफ्लहृणतरेवालार्कसदृशद्युतिः॥अष्टैश्वर्यदलंपद्मंमंत्राक्षरमचिंतयेत्॥तस्मिन्देव्यासहासीनं

चबहिरंगानि साधनानि धारणाक्रमाः॥ देशबंधश्चित्तस्य धारणा॥ नाभिचक्रे हृदयपुंडरीके मूर्द्ध
ज्योतिषि नासिकाग्रे जिह्वाग्रे इत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बंधो इति धारणा॥
तत्र प्रत्ययैकतानता ध्यानं॥ तस्मिन् देशे ध्येयालंबनस्य प्रत्ययस्यैकतानता सदृशप्रवाहः प्रत्य
यांतरेणापरामृष्टो ध्यानं॥ तत्र ध्येयस्वरूपमुक्तो दर्शितं॥ दहरं विपाप्मं वरवेश्मभूतं यत्पुंडरीकं पुरमध्य
संस्थं॥ तत्रापि दहरं गगनं विशोकं तस्मिन्यदंतस्तदुपासितव्यं॥ पद्मकोशप्रतीकाशं हृदयं चाप्यधो
मुखं॥ अधो निष्ट्या वितस्त्यां तु नाभ्यामुपरि तिष्ठति॥ हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्॥ संततं शि
राभिस्तु लंबत्याकोशसंनिभं॥ तस्यांते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितं॥ तस्य मध्ये महानग्निर्विश्वा
र्चिर्विश्वतोमुखः॥ सोऽग्रभुग्विभजंतिष्ठन्नाहारमजरः कविः॥ संतापयति स्वं देहमापादतलमस्तकं।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता॥ नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा॥ नीवारशूक
वत्तन्वी पीता भास्वत्यणूपमा॥ तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः॥ स ब्रह्मा स शिवः सेंद्रः

श्रीवत्सकौस्तुभोरस्कं पुंडरीकासमचतुर्भुजं ॥ शंखं चक्रं गदा पद्मं मुसलं खड्गमेव च ॥ सूर्यकोटिप्रतीका

यो·सं· शं चंद्रकोटिसुशीतलं ॥ प्रसन्नवदनं ध्यायेत् पीतांबरधरं हरिं ॥ अंतर्यामिस्वरूपेण विवतावास्थि

६२ तो हरिः ॥ स्थूलांगुष्ठप्रमाणेन हृन्मध्येषु वसत्ययं ॥ देहे पुरुषनामासौ स्थित्वा प्रेरयति प्रभुः ॥ तस्मात्

स एव जिज्ञास्यः परमो मोक्षमिच्छुना ॥ सर्वस्मादधिकः स्नेहो भक्तिरित्युच्यते बुधैः ॥ सा चैनमूर्द्धं नयति

हासा ॥ कारयति स्वजं ॥ तस्माद्ध्यायेत्सदा भक्तिः सैका निश्रेयसे फलं ॥ अतो यातु ममताहानिर्जायते

57 नात्र संशयः ॥ इत्यादिश्रुतिस्मृतिप्रतिपाद्य ध्येय परमात्मैव ॥ इति ध्यानम् ॥ तदेवार्थमात्रनिर्भा

सं स्वरूपशून्यमिव समाधिः ॥ ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव

६१ यदा भवति ध्येयस्वभावावेशात् तदा समाधिरित्युच्यते ॥ संप्रज्ञातसमाधावुदयलयविक्षेपकषाय राम

रसास्वादाख्याश्चत्वारो विघ्नाः संति ॥ लये निद्रा पुनः पुनः विषयानुसंधानं विक्षेपः चित्तस्य रागादिना तथी ६२

भावः कषायः समाध्यारंभसमये सविकल्पकानंदास्वादो रसास्वादः ॥ यथाहुः ॥ लये संबोधयेच्चित्तं विक्षि

षट्चक्रं षोडशाधारं त्रिलक्ष्यं पंचदेवता॥ स्वदेहे यो न जानाति कथं भवति योगवित्

कोटिशीतांशुसन्निभम्॥ चतुर्भुजं सुंदरांगं शंखचक्रगदाधरम्॥ पद्मपत्रविशालाक्षं सर्वलक्षणलक्षि
तं॥ श्रीवत्सकौस्तुभोरस्कं पीतवस्त्रधरं तमां॥ विचित्राभरणैर्युक्तं दिव्यमंडनमंडितं॥ दिव्यचंदनलिप्तां
गं दिव्यपुष्पोपशोभितं॥ तुलसीकोमलदलवनमालाविभूषितं॥ बालार्ककोटिसदृशं कांतादेव्याश्रि
याहृह॥ सर्वलक्षणलक्षण्यास्समाश्लिष्टतनुं शिवं॥ एवं ध्यात्वा जपेन्मंत्रं समाहितमनाः सुधीः॥ इति प्र
स्ताणंप्रतिभगवद्ध्यानं॥ अन्यच्च॥ नाभिमूले स्थितं पद्मं नालं तस्य दशांगुलं॥ कोमलं तस्य तन्नालं नि
मीलं तदधोमुखं॥ कदलीपुष्पसंकाशं चंद्रकांतिसमप्रभं॥ विशालदलसंपूर्णं चाष्टदलं सुनिर्मलं
पद्मकिंजल्कसदृशं लसत्कांचनसन्निभं॥ नित्यानंदमयं स्थानं तद्विष्णोः परमं पदम्॥ हृदिस्थितं पंकजम
ष्टपत्रकं सकर्णिकं केशरमध्यनीलं॥ अंगुष्ठमात्रं मुनयो वदंति ध्यायेद्विष्णुं पुरुषं पुराणं॥ अष्टप
त्रे स्थिता लक्ष्म्यादिसर्वदेवता॥ शशिमध्यगतो वह्निः वह्निमध्ये गता प्रभा॥ प्रभामध्यगतं पीठं नाना
रत्नप्रतिष्ठितं॥ अनेकरत्नसंकीर्णं ज्वलनार्कसमप्रभम्॥ तस्य मध्ये स्थितं देवं नारायणमनामयं

न्प

इति॥ किं चास्य भवति॥ ततः प्रत्यक्चेतनाधिगमोऽप्यंतरायाभावश्च॥ येतावदंतरायाव्याधिप्रभृतयस्ते तावदीश्वर
यो॰ सं॰ प्रणिधानान्न भवंति॥ स्वरूपदर्शनमप्यस्य भवति॥ यथैवेश्वरः शुद्धः प्रसन्नः केवलोऽनुपसर्गस्तथैवा प
६२ यमपि बुद्धेः प्रतिसंवेदी पुरुष इत्यधिगच्छतीति॥ अथ केऽन्तराया ये चित्तस्य विक्षेपाः के [illegible]॥ [illegible]
कियंतो वेति॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तवि
क्षेपास्तेऽन्तरायाः॥ नवांतरायाश्चित्तस्य विक्षेपाः सहैते चित्तवृत्तिभिर्भवंति। नितु च सं चित्तवृत्तिषु संभवंति॥ एका
ग्रचित्तवृत्तिषु न भवंति॥ व्याधिर्धातुरसकरणवैषम्यं॥ स्त्यानमकर्मण्यता चित्तस्य॥ संशय उभयकोटिस्पृक् म
58 विज्ञानं॥ स्यादिदमेवं नैवं स्यादिति॥ प्रमादः समाधिसाधनानामभावनं॥ आलस्यं कायचित्तगुरुत्वादप्रवृत्तिः॥
अविरतिश्चित्तस्य विषयसंप्रयोगात्मा गर्धः॥ भ्रांतिदर्शनं विपर्ययज्ञानं॥ अलब्धभूमिकत्वं समाधिभूमेरला
भः॥ अनवस्थितत्वं यल्लब्धायां भूमौ चित्तस्याप्रतिष्ठा॥ समाधिप्रतिलंभे हि तदवस्थितं स्यादित्येते चित्त राम
स्य विक्षेपा नव॥ योगमला योगप्रतिपक्षा योगांतरायाश्चाभिधीयंते॥ उक्तस्य [illegible]ज्ञानयोगाभ्यासज्ञानतत्त्वताव ६२
द्योगविक्षेपनिरोधकोपायाभ्यासपरिपूर्णचित्तानंदानुभवः सुखाविर्भावः॥ इममेवार्थं स्मृतिरुपपादयति॥ समाधिनि
र्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत्॥ न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतःकरणेन गृह्य

त्तंशमयेत्पुनः॥ सकषायं चित्तं ज्ञात्वा तत्समप्राप्तं न चालयेत्॥ नास्वादयेद्रसं तत्र निःसंगः प्रज्ञया भवेदि-
ति॥ अस्यार्थः॥ प्राणायामादिनायाभिमुखं चित्तमुपशमापयेत्॥ दोषदर्शनेन ब्रह्मानुसंधानादिना विक्षिप्तं चि-
त्तंशमयेत्॥ प्रसन्नप्राप्तं चित्तं न चालयेत् समाधानंभसमयेत् स विकल्पकानंदं नास्वादयेत् किंतु उदासी-
नः प्रसन्नप्रज्ञया युक्तो भवेदिति॥ एवं निर्विघ्नेन संप्रज्ञातसमाध्यभ्यासेनाध्यात्मप्रसादमापन्ने मनसि ऋ-
तंभरप्रज्ञा इति अतीतानागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुविषयं योगी प्रपद्यत ऋतंभरप्रज्ञातामू-
पि निरुध्य समाधिमभ्यस्यतः गुणवैतृष्ण्यंपरवैराग्यमुदेति॥ न केवलं परवैराग्यादेव समाधिलाभः
किंतु ईश्वरप्रणिधानादपि तथा चोक्तं ईश्वरप्रणिधानाद्वा॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषवि-
शेष ईश्वरः तस्य वाचकः प्रणवः तज्जपस्तदर्थभावनमिति॥ एतदुक्तं भवति॥ ईश्वरप्रणिधानाद्वा समाधि-
लाभः॥ क्लेशादिभिरसंबद्धः सर्वज्ञः सर्वशक्तिरीश्वरः॥ ईश्वरस्याभिधायकः शब्दः प्रणवः तज्जपस्तदर्थभावनं प्र-
णवस्य जपः प्रणवाभिधेयस्येश्वरस्य भावनं॥ तदस्य योगिनः प्रणवं जपतः प्रणवार्थं भावयतश्चित्तमेकाग्रं
संपद्यते॥ तथा चोक्तं॥ स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत्॥ स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशते

धा

कट्स्नानशाकोकटवर्जं॥ वर्जयेदुर्जनप्रीतिंदिवास्त्रीपथ्यसेवनं॥ प्रातःस्नानोपवासादिकायक्लेशादिकं
तथा॥ गोधूमशालियवषष्टिकशोभनान्नंक्षीराज्यमंडनवनीतसिताम्रधूनि॥ शुंठीपटोलकफलादि
पंचशाकंमुद्गादिदालमुदकंचमुनीद्रपथ्यम्॥ उष्णंसुमधुरंस्निग्धंगव्यंधातुप्रपोषकं॥ मनोभिलषितं
योग्यंयोगीभोजनमाचरेत्॥ युवावृद्धोतिवृद्धोवाव्याधितोदुर्बलोपिवा॥ अभ्यासात्सिद्धिमाप्नोतिसर्व
योगेष्वतंद्रितः॥ अथमनः॥ योगाद्यभ्यासकालेतुमनसाचिंतयेच्छुभम्॥ नाशुभंचिंतयेत्क्वापि जे
नदुःखानिविरक्ति॥ मनएवमनुष्याणांकारणंबंधमोक्षयोः॥ तस्मान्मनोजयेनित्यंसंयत्नंकुर्याद्विचक्षण
जितेमनसियत्नेनसर्वाकामानवाप्नुयात्॥ तस्मिन्नेवाजितेसर्वाकामान्नेवाप्नुयात्क्वचित्॥ अवशी
कृतचित्तस्यकुतोयोगसमाधयः॥ मनोनिग्रहणेतस्माद्यत्नंकुर्याद्विचक्षणः॥ सत्संगश्रवणेनैव
मनसोनिग्रहोभवेत्॥ संप्रदायज्ञगुरुणासंशयच्छेदकारिणा॥ श्रोतव्यंसततंभक्त्यात्मकर्मप्राप्तएवंके
तेनांतःकरणकालुष्यंप्रयात्येवनसंशयः॥ गुरुशुश्रूषयाभक्त्याश्रद्धयाचदमेनच॥ शमेननियमैर्नैव
क्षेणवैकल्पंनत्तीर्थायतनाश्रयः॥ केवलंतन्मनस्तस्यजयेनासाध्यतेपरं॥ विषयेवर्तमानस्यतस्माच्चित्तस्यसंयमे

ते॥ इति जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः॥ इत्थंमयोगानुष्ठानपद्धतिः॥ सुराज्ये धार्मिके देशे
सुभिक्षे निरुपद्रवे। एकांते मठिकामध्ये स्थातव्यं हठयोगिना॥ अल्पद्वारमरंध्रगर्त्तपिठरं नात्युच्चनीचा
यतं॥ सम्यग्गोमयलिप्तमसांद्रविमलं निःशेषजंतूज्झितम्। बाह्ये मंडपकूपवेदिरचितं प्राकारसंवेष्टितं
प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः॥ एवंविधे मठे स्थित्वा सर्वचिंताविवर्जितः॥ गुरू
पदिष्टमार्गेण योगमेव सदाभ्यसेत्॥ अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः॥ जनसंगश्च लौ
ल्यं च षड्भिर्योगो विनश्यति॥ ब्रह्मचारी मिताहारी योगी योगपरायणः॥ अब्दादूर्ध्वं भवेत्सिद्धो नात्र
कार्या विचारणा॥ सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः॥ भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते
अन्यच्च॥ द्वौ भागौ पूरयेदन्नैर्जलेनैकं प्रपूरयेत्॥ मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्॥ कट्वम्लतीक्ष्ण
लवणोष्णहरीतशाकसौवीरतैलतिलसर्षपमत्स्यमद्यं॥ अजादिमांसदधितक्रकुलत्थकोलपिण्याक
हिंगुलशुनाद्यमपथ्यमाहुः॥ भोजनमहितं विद्यात्पुनरुष्णीकृतं रूक्षमितं॥ अतिलवणसवपलल

भा.ए ६५

पुरे ८ मन्ना प्राप्नोति तथि यः पुरुषः पुरुषर्षभ ॥ केचिद्वदन्ति ने कांतं पथ्याक मेय धारुचिः ९ धर्म्मेए
के परा ख्या न्ये कामं सर्वस्वं मनः शमं ॥ अन्ये वदन्ति स्वार्थे वाते भ्ववर्ण्याया गभोजनं १० केचिद्यशं तपोरा
नं व्रतानि नियमान् यमान् ॥ आद्यं तवंतरावेषां लोकाः कर्म्मविनिर्मिताः ११ दुःखोदर्कास्तमोनिष्ठा क्षुद्रा
नंदाः शुचार्पिताः ॥ मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः १२ मयात्मना सुखं यत्तत्कुतः स्या
द्विषयात्मनां ॥ अकिंचनस्य दांतस्य शांतस्य समचेतसः १३ मया संतुष्टमनसः सर्वाः सुखमया दि
६० शः ॥ न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं ॥ न योगसिद्धिरपुनर्भवं वा मय्यर्पिता
त्मेच्छति मद्विनान्यत् १४ न तथा मे प्रियतम आत्मयोनिर्न शंकरः ॥ न च संकर्षणो न श्रीर्नैवात्मा च
६० यथा भवान् १५ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनं ॥ अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः १ राम
६ निष्किंचना मय्यनुरक्तचेतसः शांता महांतोखिलजीववत्सलाः ॥ कामैरनालब्धधियो जुषंति ६५
यन्नैरपेक्ष्यं न विदुः सुखं मम ॥ १७ बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः ॥ प्रायः प्रगल्भया

५२

२ इति नाना मत्पयोगानुष्ठायोगोपयोगि श्लोक संग्रहमनामप २

योगी योगी मिच्चमा भूयात्।। विविक्त सेवी लघ्वाशी जितवाक्यो यमालसः।। ध्यानयोगपरो नित्यं वैराग्यं समुपा
श्रितः।। मन सर्व्वेन्द्रियाणां च दृढेकाग्र्यं परमं तपः।। स ज्याय्यः सर्वधर्म्मेभ्यः स धर्म्मः पर उच्यते इति स्मरणात्
असंगचलहारिणाद्दृढभावेन ... वर्जोमात्।। शरीरनाशादर्शित्वाद्वासनान प्रवर्तते इति वा।। उद्धव उवाच।।
वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः।। तेषां विकल्पप्राधान्यमुताहो एकमुख्यता।। १ भवतोदाहृतः स्वा
मिन भक्तियोगोनपेक्षितः।। निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः २ श्रीभगवानुवाच।। कालेन नष्टा
प्रलये वाणीयं वेदसंज्ञिता।। मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः।। ३ तेन प्रोक्ता च पुत्राय म
नवे पूर्वजाय सा।। ततो भृग्वादयोगृह्णन्सप्त ब्रह्ममहर्षयः।। ४ तेभ्यः पितृभ्यस्तत्पुत्राः देवदानवगुह्य
काः।। मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः ५ किंदेवाः किंनरा नागाः रक्षः किंपुरुषादयः।। ब
ह्व्यस्तेषां प्रकृतयो रजः सत्वतमोभुवः ६ याभिर्भूतानि भिद्यन्ते भूतानां पतयस्तथा।। यथाप्रकृति सर्वेषां
चित्रा वाचः स्रवंति हि ७ एवं प्रकृति वैचित्र्याद्भिद्यंते मतयो नृणां।। पारंपर्येण केषांचित्पाखंडमतयो

५ धर्मानुसाराद्भगवत्प्राप्तिं तन्नवेद्विदुःस्वपर्यो नाप्तिरेव ... ५ सुरासुरा मनुष्याः कुतश्च विद्याधरचारणाद्यः इति
भाव

भा.ए.
६६

समाधत्स्वमनोमद्भावभावितं २८ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् क्षेमे विविक्त आ
सीनश्चिंतयेन्मामतंद्रितः २९ न तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः योषित्संगाद्यथा
पुंसो यथा तत्संगिसंगतः ३० उद्धव उवाच यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ध्यायेन्मुमुक्षु
रेतन्मेध्यानमेवक्तुमर्हसि ३१ श्रीभगवानुवाच समआसनआसीनः समकायो यथासुखं ह
स्तावुत्संगआधाय स्वनासाग्रकृतेक्षणः ३२ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः विपर्य्ययेणा
पि शनैरभ्यसेन्निर्जितेंद्रियः ३३ हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत् प्राणेनोदीर्य्य तत्राथ
62 पुनः संवेशयेत्स्वरम् ३४ एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत् दशकृत्वस्त्रिषवणं मासादर्वा
ग्जितानिलः ३५ हृत्पुंडरीकमंतःस्थमूर्ध्वनालमधोमुखं ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णि रामः
कं ३६ कर्णिकायां न्यसेत्सूर्य्यसोमाग्नीनुत्तरोत्तरम् वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ३७ स ६६

भक्तो विषयैर्नाभिभूयते १८ यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् तथा मद्विषया भक्तिरु
द्धवैनांसि कृत्स्नशः १९ न साधयति मां योगो न सांख्यो धर्म उद्धव न स्वाध्यायस्तपस्त्यागो यथा भक्ति
र्ममोर्जिताः २० भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सं
भवात् २१ धर्मः सत्यदयोपेतो विद्या वा तपसान्विताः मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि २२
कथं विना रोमहर्षं द्रवता चेतसा विना विनानंदाश्रुकलया शुध्येद्भक्त्या विनाशयः २३ वाग्गद्गदा
द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुना
ति २४ यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपं आत्मा च कर्मानुशयं विधूय मद्भ
क्तियोगेन भजत्यथो मां २५ यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः तथा त
था पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं २६ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते मा
मनुस्मरतश्चित्तं मय्येव प्रविलीयते २७ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं हित्वा मयि

५ क्षुधापिपासा प्राणस्य मनसा शोकमोहकौ॥ जरामरणशरीरस्य षडुरमीरहितो शिवः ५

सिद्धयः १ श्रीउद्धवउवाच कयाधारणयाकास्वित्कथंस्वित्सिद्धिरच्युत
पतश्चेतउपतिष्ठंति
भा॰ए॰ कतिवासिद्धयोब्रूहियोगिनांसिद्धिदोभवान् २ श्रीभगवानुवाच सिद्धयोष्टादशप्रोक्ताधा
६२ रणायोगपारगैः तासामष्टौमत्प्रधानादशैवगुणहेतवः ३ अणिमामहिमामूर्त्तेर्लघिमा
प्राप्तिरिंद्रियैः प्राकाश्यंश्रुतदृष्टेषुशक्तिप्रेरणमीशिता ४ गुणेष्वसंगोवशिता यत्का
मस्तदवस्यति एतामेसिद्धयःसौम्य अष्टावौत्पत्तिकामता ५ अनूर्मिमत्वंदेहेस्मिन्दूरश्रव
णदर्शनं मनोजवःकामरूपंपरकायप्रवेशनं ६ स्वछंदमृत्युर्देवानांसहक्रीडानुदर्शनं
62 यथासंकल्पसंसिद्धिराज्ञाप्रतिहतागतिः ७ त्रिकालज्ञत्वमद्वंद्वंपरचित्ताद्यभिज्ञता अग्न्य
र्कांबुविषादीनांप्रतिष्टंभोपराजयः ८ एताश्चोद्देशतःप्रोक्तायोगधारणसिद्धयः यया रामच
धारणयायास्याद्यथावास्यान्निबोधमे ९ भूतसूक्ष्मात्मनिमयितन्मात्रंधारयेन्मनः ६
अणिमानमवाप्नोतितन्मात्रोपासकोमम १० महत्यात्मन्मयिपरेयथासंस्थंमनोदधत्

मंप्रशांतंसुमुखंदीर्घचारुचतुर्भुजं सुचारुसुंदरग्रीवंसुकपोलंसुचिस्मितं ३८ समानकर्णविन्यस्त
स्फुरन्मकरकुंडलं हेमांबरंघनश्यामंश्रीवत्सश्रीनिकेतनं ३९ शंखचक्रगदापद्मवनमालावि
भूषितं नूपुरैर्विलसत्पादंकौस्तुभप्रभयायुतम् ४० द्युमत्किरीटकटककटिसूत्रांगदायुतं सर्वां
गसुंदरंहृद्यंप्रसादसुमुखेक्षणम् ४१ सुकुमारमभिध्यायेत्सर्वांगेषुमनोदधत् इंद्रियाणींद्रि
यार्थेभ्योमनसाकृष्यतन्मनः ४२ बुध्यासारथिनाधीरःप्रणयेन्मयिसर्वतः तत्सर्वव्यापकंचित्तमाकृ
ष्यैकत्रधारयेत् ४३ नान्यानिचिंतयेद्भूयःसुस्मितंभावयेन्मुखं तत्रलब्धपदंचित्तमाकृष्यव्योम्नि
धारयेत् ४४ तच्चत्यक्त्वामदारोहोनाकिंचिदपिचिंतयेत् ध्यानेनेत्थंसुतीव्रेणयुंजतोयोगिनो
मनः ४५ संयास्यत्याशुनिर्वाणंद्रव्यज्ञानक्रियाभ्रमः एवंसमाहितमतिर्मामेवात्मानमात्मनि
विचष्टेमयिसर्वात्मन्ज्योतिर्ज्योतिषिसंयुतं ४६ इतिश्रीभागवतेमहापुराणेएकादशस्कंधे
चतुर्दशोऽध्यायः श्रीभगवानुवाच जितेंद्रियस्ययुक्तस्यजितश्वासस्ययोगिनः मयिधार

यद्रूपंबुभूषति तत्तद्भवेन्मनोरूपंमद्योगबलमाश्रयः २३ परकायंविशन्सिद्धआत्मानंतत्रभावयेत्
पिंडंहित्वाविशत्प्राणोवायुभूतःषडंघ्रिवत् २४ पार्ष्ण्यापीड्यगुदंप्राणंहृदुरःकंठमूर्द्धसु आरोप्य
भा०ए० ब्रह्मरंध्रेणब्रह्मनीत्वोत्सृजेत्तनुं २५ विहरिष्यन्सुराक्रीडेमत्स्थंसत्वंविभावयेत् विमानेनोपति
६८ ष्ठंतिसत्ववृत्तीसुरस्त्रियः २६ यथासंकल्पयेद्बुद्ध्यायदावामत्परःपुमान् मयिसत्येमनोयुंजं
स्तथातत्समुपाश्नुते २७ योवैमद्भावमापन्नईशितुर्वशितुःपुमान् कुतश्चिन्नविहन्येततस्यचाज्ञा
गु यथामम २८ मद्भक्त्याशुद्धसत्वस्ययोगिनोधारणाविदः तस्यत्रैकालिकीबुद्धिर्जन्ममृत्यू
63 पबृंहिता २९ अग्न्यादिभिर्नहन्येतमुनेर्योगमयंवपुः मद्योगशान्तचित्तस्ययादसामुदकं
यथा ३० मद्विभूतीरभिध्यायन्श्रीवत्सास्त्रविभूषिता ध्वजातपत्रव्यजनैःसभवेदपराजितः रामः
३१ उपासकस्यमामेवयोगधारणयामुनेः सिद्धयःपूर्वकथिताउपतिष्ठंत्यशेषतः ३२ जिते
न्द्रियस्यदांतस्यजितश्वासात्मनोमुनेः मद्धारणांधारयतःकासासिद्धिःसुदुर्लभा ३३ अंतरा ६८

गुरूपदेशतोभक्त्या सम्यगभ्यासतस्तथा॥ ज्ञातव्यः परमात्मैवंभक्तिकन्तत्परेण वै ५८५

हि १

मयिमानमवाप्नोतिभूतानांच पृथक्पृथक् ११ कालसूक्ष्मार्थतां योगीलघिमानमवाप्नुया
त् परमाणुमयेचित्तंभूतानांमयिरंजयन् १२ धारयन्मय्यहंतत्वेमनोवैकारिकेखिलम् सर्वेन्द्रिया
णामात्वंप्राप्तिःप्राप्नोतिमन्मना १३ महत्यात्मनियःसूत्रेधारयेन्मयिमानसं प्राकाम्यंपारमे॰
ष्ठ्यंमेविंदतेव्यक्तजन्मनः १४ विष्णौत्र्यधीश्वरेचित्तंधारयेत्कालविग्रहे सईशित्वमवाप्नोतिक्षेत्रज्ञ
क्षेत्रचोदनां १५ नारायणेतुरीयाख्येभगवच्छब्दशब्दिते मनोमय्यादधद्योगीमद्धर्मावशिता
मियात् १६ निर्गुणेब्रह्मणिमयिधारयन्विशदंमनः परमानंदमाप्नोतियत्रकामोवसीयते १७
श्वेतद्वीपपतौचित्तंशुद्धेधर्ममयेमयि धारयंश्वेततांयातिषडूर्मिरहितोमनः १८ मय्याकाशा
त्मनिप्राणेमनसाघोषमुद्वहन् तत्रोपलब्धभूतानांहंसोवाचःशृणोत्यसौ १९ चक्षुस्त्वष्टरि
संयोज्यत्वष्टारमपिचक्षुषि मांतत्रमनसाध्यायन्विश्वंपश्यतिसूक्ष्मदृक् २० मनोमयिसु
संयोज्यदेहंतदनुवायुना मद्धारणानुभावेनतत्रात्मायत्रवैमनः २१ यदामनउपादाय

कं फलं ॥ कन्याकृष्टगमनं पुनरावृत्तिलक्षणं ॥ कृजपो वासुदेवेति मुक्तिबीजमनुत्तमं ॥ तस्मादहर्निशं विष्णुं सं
स्मरन् पुरुषो मुने ॥ न याति नरकं शुद्धः संक्षीणाखिलपातकः ॥ इति विष्णुपुराणे ॥ पद्मपुराणे कश्चिद्ब्राह्मण
भा.प. धर्मराजसंवादगतवाक्यं ॥ ब्राह्मण उवाच ॥ साधनानां प्रयत्नेन भक्तानामभयप्रद ॥ तुष्टे यस्य प्रसादेन कामाः क
६६ रतले स्थिताः ॥ सर्वयज्ञतपोदानतीर्थसेवाधिकं फलं ॥ लभ्यते येन पापघ्नि वैवस्वत तदादिश ॥ अनुग्राह्यो स
हं देव ब्रूहि धर्मोपदेशने ॥ सर्वधर्मक्रियासारं तदेकं कृपयावरः ॥ पापानामनुरूपाणि प्रायश्चित्तानि यद्यथा
तथा तथैव संसृष्टं कथितानि महर्षिभिः ॥ कर्तुं तानि न शक्यन्ते देव प्रत्येकशो नरैः ॥ सर्वपापापहं पुण्यमेकं चेदस्ति
तद्वद ॥ यम उवाच ॥ परितुष्टोऽस्मि ते विप्र स्तोत्रेण च विशेषतः ॥ तथाभ्यागतधर्मेण मान्योऽसि कृपयाधिकं ॥ पन्न
64 कस्य चिरात्त्वां न यज्ञोऽप्यपरं मम ॥ सारं तु सर्वधर्मेषु यदेकं परमं मतं ॥ महानिरयसंघातनिर्वासनमकं परं ॥
